# द्वितीयप्रकरणम्
# वैदिकसाहित्ये विषयवैविध्यं वैशिष्ट्यञ्च ।

२.१ समस्तप्राचीनविधानां निधानं 'वेदविद्या' ।

२.२ वैदिकवाङ्मयस्ये प्रकीर्णतमः चिन्तनपन्थाः ।

२.३ वैदिकवाङ्मये सूक्तद्वारा तत्वदर्शनम् ।

२.३.१ वैदिकवाङ्मये देवस्तुतिपरसुक्त

२.३.२ वैदिकवाङ्मये दार्शनिकसुक्त

२.३.३ वैदिकवाङ्मये लौकिकसुक्त

२.३.४ वैदिकवाङ्मये संवादसुक्त

२.३.५ वैदिकवाङ्मये आख्यानसुक्त

२.४ वैदिकवाङ्मयेतरे गौणविषयाः ।

२.४.१ वैदिकवाङ्मये षोडशसंस्काराः

२.४.२ वैदिकवाङ्मये आयुर्विज्ञानम् ।

२.४.३ वैदिकवाङ्मये वर्णाश्रमव्यवस्था ।

# द्वितीयप्रकरणम्
# वैदिकसाहित्ये विषयवैविध्यं वैशिष्ट्यञ्च ।

## २.१ समस्तप्राचीनविधानां निधानं 'वेदविद्या' ।

परमेश्वरेण जगति समुत्पादितेषु सर्वद्रव्येषु विद्यैव सर्वश्रेष्ठं द्रव्यम् । विद्याद्रव्येणविहीनः यो मानवोऽस्ति सः असभ्यः, मूर्खः, ग्रामीर्णः कथ्यते । विद्याविहीनः मानवः अन्धः एव निगद्यते । उक्तञ्च

इदमन्धतमः कृत्स्नं जायते भुवनत्रयम् ।[1]
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ॥
(आचार्यप्रवरः दण्डी)

अखिलसंसारस्य एतावता नेत्ररत्ना इवास्ति विद्याद्रव्यम् । किन्तु समस्तविद्यानां विज्ञानं कलिकाले मानवानां कृते शतप्रतिशतं यावत् नास्ति सम्भवः । अतः वेदानां विज्ञानं मानवैः सेवनीयम् । यतो हि वेदविद्या एव समस्तप्राचीनविद्यानां निधानं वर्तते ।

अर्थात् संस्कृतभाषायाः, निखिलसंसारस्य भारतीयसंस्कृतेश्च 'वेदविद्या' एव ज्ञानाङ्कुरः वर्तते । स एवाङ्कुरः विस्तरेणाधुना समस्तविद्यानां निधानं निष्कृष्टत्वेन निष्कर्षीभूतः । विचारोऽयमस्ति वेदविद्यायां जगतस्य समस्तं ज्ञानं निहितमस्ति । तच्च विज्ञानं कथं ? तदिहाहं सङ्क्षेपेण लिखामि । यथा ....

प्रत्यक्षेषानुमित्या वा यस्तूपायो न विद्यते ।
एतं विदन्ति वेदेन तस्माद् वेदस्य वेदता ॥

---

१ आचार्यप्रवरः दण्डी

एवं वेदो हि नाम अशेषज्ञानविज्ञानराशिः । आम्नायः, आगमः, श्रुतिः, वेद इति समानार्थकाः शब्दाः । अतः वेदविद्या खलु अशेषविश्वविज्ञान-विशेषपरिज्ञानप्रदायिका विज्ञानविद्यायाः निधानमस्ति । तत्र चेत्थं सविशदं ज्ञानं सर्वत्र प्राप्यते । यथा -

**वर्णाश्रमधर्माः**

वेदेषु मनुष्यणां कर्मोदिभेदतः पञ्च श्रेणिविभागाः दृश्यन्ते - ब्राह्मणः, क्षत्रियः, वैश्यः, दासः, दस्युश्च । दस्युः खलु अनार्यः । आर्याश्चत्वारः । ते भेदाः पश्चाज्जातिपदेन प्रचलिताः । परं सर्वजनैः परस्परं प्रीतिभावेन वर्तितव्य-

प्रियं मा कृणु देवेषु प्रियं राजसु मा कृणु ।[१]
प्रियं सर्वस्य पश्यतः उत शूद्र उतार्ये ॥
(अथर्ववेदः)

**चत्वार आश्रमाः**

मानवजीवनं चतुर्षु विभागेषु विभक्तं विद्यते । चत्वारो विभागाः चत्वार आश्रमा उच्यन्ते - ब्रह्मचर्य-गृहस्थ-वानप्रस्थ-संन्यासलक्षणाः । पञ्चविंशतिवर्षपर्यन्तम् एकस्मिन्नाश्रमे विश्रम्य चत्वारोऽप्याश्रमा सेव्याः, तेषु प्रथमः सर्वैरपरिहार्यत्वेन सेव्यः । गृहस्थादित्रयः आश्रमास्तु ऐच्छिकाः । सोऽयं प्रथमः ब्रह्मचर्याश्रमः मानवजीवनस्याधारभूतः, यतः स एव शारीरिकीं मानसीं च शक्तिं विकासयति । तथा च

ब्रह्मचर्येण तपसा देवा मृत्युमुपाघ्नत ।
इन्द्रो ह ब्रह्मचर्येण देवेभ्यः स्व रामरत ॥ इति ।

---

१ स्त्रीपुरुषयोः समानाधिकारः

ब्रह्मचर्यकाले ब्रह्मचारिणो गुरुकुलाश्रमे निवसन्तः आचार्यसकाशात् विविधा विद्याः, शिल्पकलाः, विज्ञानानि च शिक्षन्ते स्म निशुल्कम् । ब्रह्मचर्याश्रमानन्तरं गृहस्थाश्रमस्य चोपक्रमः विवाहसंस्कारेण सञ्जायते ।

वेदेषु स्त्रीपुरुषयोः समानाधिकारः उपदिष्टः । उभयोः शिक्षा दीक्षा च पितृभ्यां समानभावेन सम्पादनीया । षोडशसंस्कारेषु विवाहः खलु प्रधानतमः । अयं सम्बन्धः अविच्छेद्योऽग्निसाक्षिकः मैत्रीभावरूपः मन्त्रैः नियन्त्रितः । पाणिग्रहणानन्तरं वधूवरो जगदतुः

''समञ्जन्तु विश्वे देवा समायो हृदयानि नौ ।
सम्मातरिश्वा सं धाता समु देष्ट्री दधातु नौ ॥

पाणिग्रहणसंस्कारे प्रथमं तावत् पाणिग्रहणम्, ततो यज्ञाग्निपरिक्रमा, ततो लाजाहोमः, ततः शिलारोहणम्, ध्रुवदर्शनम्, सूर्यदर्शनम्, सप्तपदी च । ततः परस्परं समानं सौहार्दं जायते । पतिकुलमपि परिणीतायाः देव्याः गौरवास्पदं पदम् -

''साम्राज्ञीश्वशुरे भव साम्राज्ञी श्वश्रुवां भव ।
ननान्दरि साम्राज्ञी भव साम्राज्ञी अधिदेवृषु ॥'' इति ॥

विवाहसम्बन्धस्याविच्छद्यत्वं वेदे वर्तते । एष विवाहसम्बन्धः न तात्कालिकोऽपितु नित्यः यावज्जीवनस्थायी च । तथा च वेदेऽयमादेशः यदेकः पतिः एकामेव पत्नीं परिणयेत् । पत्न्यपि एकमेव पतिं वृणुयात् । अपि च वेदे भगिनी-भ्रातृविवाहः सर्वथा निषिद्धः ।

वेदानामपौरूषेयत्वं नित्यत्वं च प्रायः सर्वेऽपि प्राचीनाचार्याः स्वीचक्रुः । ''प्रलयकालेऽपि परमात्मनि वेदराशिः स्थितः'' इति भगवता कुल्लुकभट्टेन

वेदानां नित्यत्वं प्रदर्शयतोक्तम् । वस्तुतः सृष्ट्युत्पत्तिसमकालमेव आदिमहर्षीणां हृदयेषु वेदज्ञानं प्रादुरभूत ।

**वैदिकधर्मस्य स्वरूपम्**

वेदप्रतिपादितः धर्मः वैदिकधर्मः । वैदिकधर्मे ईश्वरः, अजरः, अमरः, शुद्धः, व्यापकः, सर्वशक्तिमान्, जगन्नियन्ता, सर्वज्ञः, न्यायशीलः, शुभाशुभकर्मफलदाता, सृष्टि-स्थिति-प्रलयकर्ता च । तथा चोक्तम् -

'तमेकं सत् विप्रा बहुधा वदन्ति ।"

ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत ।

तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम् ॥

(इशोपनिषद-१)

स एव ईश्वर उपास्यः । इत्थमीश्वरस्वरूपं निरूपितम् ।

**वेदे मोक्षस्यानन्दः**

"यत्र ज्योतिरजस्रं यस्मिन् लोके स्वर्हितम् । तस्मिन्

मां धेहि पवमानामृते लोके अक्षित इन्द्रायेन्दो परिस्रव ।"[१]

(ऋग्वेदः)

ऋगुक्तानुसारे वेदे मोक्षानन्दस्वरूपस्य वर्णनं दृश्यते ।

स खलु मोक्षानन्दः सत्येन, तपसा, श्रद्धया तथा च आध्यात्मिक-ज्योतिष्प्रदीप्त्या एव सम्भवः ।

यस्य च ज्योतिषा आत्मायं ज्योतिष्मान् भवति तं स्तौति -

---

१ ऋग्वेदः

"एकएवाग्निर्बहुधा समिपो एकः सूर्यो विश्वमनुप्रभूतः । एकैवोषा सर्वमिदं विभात्येकं वा इदं वि वभुव सर्वम् ॥ (ऋग्वेदः)

**वेदे पुनर्जन्म**

पुनर्जन्मसम्बन्धि अतिरमणीयं तत्वं ऋचो वर्णयन्ति

आ यो धर्माणि प्रथमः ससाद ततो वपूषिं कृणुते पुरूणि ।[1]
धास्युर्योनिं प्रथम आविवेश दो वाचमनुदितां चिकेत ।
(अथर्व वेदः)

"भूतस्य जातः पतिरेक आसीत् ।
यः देवेषु अधिदेव एक आसीत् ।"

अत्र परमात्मैव हिरण्यगर्भः तदुपाधिभूतानां पृथिव्या दीनां भौतिकानां ब्रह्मणः सकाशादुत्पत्तेः । स एक एको । द्वितीयः सन् भूतस्य विकारभूतस्य ब्रह्मणाण्डादेः पतिरासीत् ।

**वेदे राष्ट्रभावना**

वेदेऽखिलमेव विश्वं राष्ट्रत्वेना भिमतम् । तादृशराष्ट्रस्य राजा तादृशो भवेत् यं सर्वाः प्रजाः वाञ्छेयुः । उक्तञ्च –

"ध्रुवं ते राजा वरूणो ध्रुवं देवो बृहस्पतिः ।[2]
ध्रुवं त इन्द्रश्चाग्निश्च राष्ट्रं धारयतां ध्रुवम् । ऋक्
(ऋग्वेदः)

---

१. अथर्ववेदः

२. ऋग्वेदः

भद्रमिच्छन्त ऋषय स्वर्विदस्तपो दीक्षामुप निषेदुरग्रे ।[1]
ततो राष्ट्रं बलमोजश्च जातं तदस्मै देवाउपसंनमन्तु ॥
(अथर्ववेदः)

**वेदेमांसभक्षणनिषेधः**

वेदे गोमांस–मनुष्यमांस–अश्वादिमांसभषणस्य निषेधः । तथा हि

यः पौरुषेयेण क्रविषा समङ्क्येयो अश्व्येन पशुना यातुधानः ।
यो अध्न्या भरति क्षीरमग्ने तेषां शीर्षाणि हरसा वि वृश्च ॥
(ऋक्)

पुरूष–अश्वादिमांसभक्षयितुः शिरच्छेदो दण्डरूपेण विहितः । गोदुग्धपरिहर्तुश्चापि शिरच्छेदो व्यवस्थितः ।

**वेदे द्यूतनिषेधः कृषिप्रशंसा च –**

ऋग्वेदस्य दशममण्डले 'अक्षाख्य–द्यूतक्रीडायाः निन्दा निषेधश्चोपदिष्टः । तथा हि –

अक्षैर्मा दीव्यः कृषिमित कृषस्व वित्ते रमस्व बहुमन्यमानः ।[2]
तत्र गावः कितव तत्र जाया तन्मे विचष्टे सवितायमर्यः ॥
(ऋग्वेदः)

प्रसविता अयमीश्वरः आचष्टे द्यूतं मा कुरू । कृषिमेव कृषस्व, तत्सम्पादिते धने रतिं कुरू । द्यूते पराजितस्य का दशा भवति ?

---

१. अथर्ववेदः

२. ऋग्वेदः

जाया तप्यते कितवस्य हीना माता पुत्रस्य चरतः क्वस्चित् ।

ऋणावा बिभ्यद्धनमिच्छमानोऽन्येषामस्तमुप नक्तमेति ॥

कितवस्य भार्या तप्यते । मातापि संतप्ता भवति। अक्षपराजयात् ऋणवान कितवः भयमापन्नः कस्यचिद् धनिनः गृहे रात्रौ चौर्यमुपगच्छति, इति कीदृशः स शोच्चः ।

एवं विद्याः जनकल्याणकारिण विशिष्टविषयाः परामर्शाश्च वेदेषु निर्दिष्टाः सन्ति । तेषामुनुष्टानेन मानवसमाजस्य नितरां कल्याणं भवति ।

**वैदिकवाङ्मयस्य प्राचीनत्वम्**

ऋग्वेदः भारतीय सम्पदायाः ज्ञानराशिग्रन्थः इति तु निर्विवादितम् । भारतीय समाजः कीदृशः आसीत तस्य प्रमाणमिदम् ।

वैदिकसाहित्यसम्पत्ति कियत् प्राचीना इत्यत्रास्ति विद्वत्समाजे मतभेदः । केषाञ्चित् मतेन ई.स. त्रिलक्षवर्षेभ्यः पूर्वम् एवं, केषाश्चित् मतेन ई.स.६०० वर्षेभ्यः पूर्वं इति तु निश्चयेन आमनन्ति । यजुर्वेदः, अथर्ववेदः आदि ऋग्वेदात् बहुकालानन्तेरण सम्भूताः । अतः शोधविद्वांसः ऋग्वेदमेव प्राचीनं प्रामाणिकश्च स्वीकुर्वान्ति ।

**वैदिककालीन : समाजः**

यदि ऋग्वेदकालीनस्य भारतीयसमाजस्य एकं दीर्धं चित्रं स्पष्टं कर्तव्यं भवेत् चेत् स्पष्टं भवति तत्कालिनः समाजः ग्रामप्रधानः, कृषिप्रधानः तथा च समृद्धिपूर्णविचारैः विकसितः शासितः अनुशासनपूर्णश्च जनसमूहश्चासीत् । अथर्ववेदकाले तु ग्रामात् बहिरागत्य नगरस्य अस्तित्व स्पष्टं प्रतिभाति । आश्चर्यस्य वार्ता सा यत् अधिकांशरूपेण सभ्यताविषये प्रारम्भकाले

आदिमानवसमाजः अन्धविश्वासपूर्णः, रूढिवादपूर्णः तथा च दोषदृष्टात्मकदृष्टिपूर्णः आसीत् । शनैः शनैः ज्ञानविकासेन सहितस्य दृष्टिकोणः, विचारदृष्टिः अपि च प्रगतिशीला प्रतिभाति ।

**वैदिकवाऽ्मये नारीस्थानम् ।**

ऋग्वेदकाले नारीणां प्रतिष्ठा समाजे अभिन्ना अपूर्वा चासीत् यथा पुरूषाणां स्थानं, मानं, प्रतिष्ठा आसीत् तथैव तासाम् । ऋग्वेदस्य ऋचां रचनां कृत्वा ऋषिपदं प्राप्तवत्यः घोषा, लोपामुद्रा अपाला, रोमशा, सूर्या आदयः अनेका विदुष्यः समुपलभ्यन्ते । ब्रह्मवादिन्यः, स्त्रियः स्त्रियः पठन्ति स्म, गुरूकुलं चालयन्ति स्म, शासनं च कुर्वन्ति स्म । स्त्रिणामेतत् स्थानं उपनिषत्कालानन्तरं परिवर्तनशीलं जातम् ।

**विवाहरीतिः**

ऋग्वेदकालीनसमाजे बालविवाहप्रथा विषये उल्लेखः न संप्राप्यते । स्मृतिकाले प्राप्ते तेत्रापि परिवर्तनमातम् । 'अष्टवर्षा भवेत गौरी' इत्युक्त्वा अष्टवर्षायाः कन्यायाः विवाहः कर्तव्यः पुण्यकर्मणि सा तस्यां वयसि प्रवृत्ता भवेत् ततः अधिकः कालः न गच्छेत मान्यथा पापभाग भवेत् इति प्रथा जाता ।

'सोमो वधूय्रुरभवदश्विमा ता उभा चरा । सूर्यां [१]
यत पत्ये शंसन्ति मनसा सविताऽददात ।

१. ऋग्वेदः १०/८५/९

अनया ऋचा स्पष्टं भवति यत् ऋग्वेदकालो प्राप्तयौवना युवती हि विवाहयोग्या इति आसीत् । ऋग्वेदे सामिषः च निरामिषाः च आहार यः स्वादिष्टः पोषकः च सर्वैः ग्रहणार्हः भवति स्म ।

**आवासशयनविषयविज्ञानम्**

ऋग्वेदकालीनसमाजे जीवनस्योपभोगं प्रति स्वस्थविचायुक्तः आसीत् । तदानीं स्वस्थः प्रबुद्धः समाजः आसीत् । ऋग्वेदकाले आवासनिवास विषये भवनानां यत् वर्णनं संप्राप्यते तेन ज्ञानं भवति यत् आर्यपुरूषाः जनाः समस्तसुखसौविध्दस्य पूर्णतया विचारं कृत्वा गृहनिर्माणं कुर्वन्ति स्म ।

"इन्द्रत्रिधातुशरणं त्रिवरूथं स्वस्तिमत् । छार्दिर्धच्छंमधवदभ्यश्च महयं च यावना दिद्युमेभ्यः ।"[१]

(ऋग्वेद-६/४६९)

अस्यां ऋचौ त्रिविभागपूर्णस्य भवनस्य समृद्ध वर्णनं संप्राप्यते । सर्वस्मिन् गृहे एका अग्निशाला, एकः भण्डार, एकं अन्तर्गृहं, एकः च वातायनपूर्णः प्रकोष्ठ अवश्यंभवति स्म । तेन सह पशुपालनाय, रक्षणाय एका भिन्ना शालापि भवति स्म । अनिवार्यरूपेण पशुपालनव्यवस्था भवति स्म । विशालभवने तु अतिथीनां निवासाय भिन्ना व्यवस्था आसीत् । गोमयपाषण - धुलीष्किानां प्रचुरतया उपयोगः भवति स्म । तस्य वर्णनं ऋग्वेदे संप्राप्यते । समृद्धकूलवधूनां आरामपर्णा विशाला शय्या भवति स्म तस्याः वर्णनमपि लभ्यते ।

---

१. ऋग्वेदः -६/४६९

प्रोष्ठेशया वहयेशया नारीर्यास्तल्यशीवरीः ।[1]

स्त्रियो याः पुण्यगन्धास्ताः सर्वाः स्वापयोमसि ॥

(ऋग्वेद-७/५५/८)

तदानीं शय्यानां अपि विविधप्रकाराः आसन् । अन्नता काष्ठनिर्मितो, ययोः द्वौपादौ आस्ताम् । नववधुकृते विशाला विस्तृता शय्या भवति स्म । विस्तृतशय्यायां दम्पतीनां शयनं भवति स्म । पर्यङ्कः बृहदाकारपूर्णः भवति यः रसिकानां कृते प्रियःभवति स्म । परिवर्तिकाले अथर्ववेदसमये आसन्दप्रकाराणाम् अस्तित्वम् आगतम् । विविधवस्त्रप्रकारैः शय्ययाः निर्माणं भवति स्म अथर्ववेदकाले वस्त्रनिर्मितशय्यानां किञ्चित् निर्माणकार्यं तु गृहे एव भवति स्म । अनेन तत् स्पष्टं भवति यत् माता पुत्राय सज्जतां करोति ।

**वस्त्रालङ्कारवर्णनम्**

वितन्वते धियो अस्रा अपांसि वस्रा पुत्राय मातरों वयन्ति ।[2]

(ऋग्वेद-५/४७/५६)

धनीनां वस्त्रवयनं सर्वेभ्यः भिन्नं भवति तेषां वस्त्राणि दृष्ट्वा एव ज्ञानं अभवत् यदिमानानि धनिनां स्युरिति । ऋग्वेदकालेऽपि चमत्कारपूर्णानि वस्त्राणि अप्रतिमप्रतिभाभिः पूर्णानिभवन्ति स्म । ऋग्वेदकाले तस्य बहुमूल्यमासीत् । तस्मिन् समये कार्यान्विताः पशवः भवन्ति स्म येषां बहु उत्तरदायित्वं आसीत् । पशवः धनरूपाः आसन् । धनिनांपदा तुलना भवति तदा पशूनां गषना भवति यः गृहस्थः अधिकाधिकपशुयुतो भवति स्म समाजे धनवान् । 'शतगुः' अर्थात्

---

१. ऋग्वेद -७/५५/८

२. ऋग्वेद - ५/४७/५६

शतादधिकगाव: यस्य पार्श्वे अस्ति स: । धेनूनां सङ्ख्यया धनीनो स्थानं निश्चितं भवति स्म । कारणं गाव: तदानीं धनस्य एक: प्रमुख: प्रकार: आसीत् । धेनुभ्य: भिन्ने सुवर्णरजतादिधातव: पश्चात्क्रमे आगच्छति । किन्तु तेषां स्थानं धेनुभ्य: अनन्तरमासीत् । एतादृशं वर्णनं बहुधा चित्रितं वर्तते । "हिरण्यस्येयं कलशं मिखातम्"[१] ऋग्वेदे एतादृशा: बहव: सङ्केता: संप्राप्यन्ते । तदानीं कलशे सवर्णमुद्राणा रक्षणं भवति स्म च तेषु कलशेषु मुद्राणां गोपनं कृत्वा भूमौ गोपयन्ति स्म । धनसङ्गृहस्य एक: प्रकार: आसीत्

**श्रृंगारविमर्श:**

"रूपयौवन सौभाग्यं स्त्रीणां बलमनुत्तमम् ।"[१]

महाभारत –१२/३०८/७३

सुवर्णादिधातुनांम् आभूषणानि न केवलं स्त्रिय: अपि तु पुरूषा: अपि रत्नाभूषणानि धरन्ति स्म । पुरूषा: सुवर्णमालादीनां "हिरण्येन मणिना शुभमानां:"[२] (ऋग्वेद: ७/८६/६) इति अकत्वा वृत्रासुरेण स्वस्य अनुयायिनां वर्णनं कृतं विद्यते । कर्णशोभायै, वक्षस्थलाशोभायै आभूषणानि धारयन्ति स्म । नार्य: तु बहुविविधप्रकाराणाम् आभूषणानि धरन्ति स्म । कपर्द:, केयूर:, कुण्डलादि बहूनि आभूषणानि स्त्रिभि: सह पुरूषा: धरन्ति स्म । तदानीं अपि नार्य: केशप्रधानानि प्रसाधनानि कुर्वन्ति स्म । पुरूषा: श्मश्रूधारणं, क्षौरकर्म इत्यादिसर्वं तदानीमपि अकुर्वन । श्मश्रुधारणं पुरूषत्वस्य प्रतीकमभवत् ।

**कृषि:**

ऋग्वेदकाले कृषि: एवं पशुपालनं प्रमुखरूपेण अर्थप्रधानकार्ये आस्ताम् । तदानीं सर्वेषु ग्रामेषु कुम्भकार:, सुवर्णकार:, वृषक:, काष्टकार इत्यादय:

---

१. महाभारत–१२/३०८/७३
ऋग्वेद – ७/८६/६

न्यवसन् । तादृशं वर्णनं ऋग्वेदे दृश्यते पठ्यते च । प्रत्येकजनः संगीतक्षेत्रं खगोलविद्यायां ज्ञातः भवति । सर्वं प्रायः, कृषकः, पशुपालन अभवन् । सर्पासु ऋतुषु प्राप्ते लाभे सति सर्वे मिलित्वा यज्ञादिकर्माणि महोत्सवानां आयोजनं च कुर्वन्ति स्म । तादृशमपि वर्णनं विशेषतया मिलति । मनोविनोदाय अपि आयोजनं भवति स्म । सोमरसः एकः पृष्टिकरः, आहलादकः पेयपदार्थः अभवत् । यस्य जनाः मिलित्वा सामूहिकं पानं कूर्वन्ति स्म । विशेषतया देवाः प्रतिष्ठितजनाः अस्य पानं सविशेषदिवसेषु अकुर्वन् । यदा कश्चित् उत्सवः भवति तक्षतत्र उत्सवे प्रमुखरूपेण सोमपानं अभवत् ।

**भोज्यप्रेयव्यसनादिविषये**

सोमरसः एकः वनस्पति विशषरसः भवति । उच्चपदार्थस्य रसः भवति । सुरा इति सोमरसात् भिन्नः पदार्थे भवति । सुरागर्हितः निन्द्यः पदार्थरूपेण परिगव्यते । 'न स्वो दक्षो वरूण ध्रुतिः सा । सुरा मन्युर्विभिदको अचितिः ।'[१] (ऋग्वेद ७/८६/६)

इत्युक्त्वा कलहः, द्युतं मूर्खतापूर्णं कार्यं तथा सुरापानं इमानि कर्माणि, कार्याणि धृणापूर्णानिसन्ति । स्वादिष्टभोजने आमिषनिरामिषपदार्थानां समावेशः भवति स्म । संगीतं, नृत्यं, विज्ञानं, चर्चा, च आमोदप्रमोदपूर्णाः संलापाः यज्ञोत्सवानां अनिवार्यक्रियाकलायाः अभवन् ।

भोज्यपदार्थेषु दुग्धं, दधि, धृतं तथा धृतनिर्मितपदार्थाः प्रमुखाः भवन्ति स्म । ऋग्वेदे नैकेषां स्वादिष्टदुग्धधृतपदार्थानां भोज्यवस्तूनां समुल्लेखः

---

१. ऋग्वेद ७/८६/६

दृश्यते । गोधूमस्योल्लेखः ऋग्वेदे नास्ति । परवर्ति साहित्ये तस्य प्रमाणां लभ्यते ।

अन्नस्य महत्वं ऋग्वेदे सविस्तरेण विवर्णितं विद्यते । तत्कालीनसमाजः सभ्यतापूर्णः, कृषिप्रधानः तेन कारणेन धान्यं, पशुधनं ऋग्वेदकालस्य महत्वपूर्णा संपत्तिरासीत् । एभिः सङ्कैतैः एतत् स्पष्टं भवति यत् ऋग्वेदस्य संस्कृतिः एका प्रबुद्धा विशाला विकसित मानवसमाजस्य प्रतिनिधित्वपूर्णा आसीत । सहस्रवर्षेभ्यः प्राचीना इयं संस्कृतिः तदपि सिद्धं भवति । बहुवर्षेभ्यः प्राचीना वर्तते तथापि आदिमानववत् अपरिपक्वानां तत्र न प्राप्यते । कथनस्याशयः यत् प्रारम्भतः वेदकालादेव इयं संस्कृतिः परिपूर्णा परिपक्वा चास्ति इति निर्विवादत्वेन स्वीकरणार्थं वर्तते ।

इत्थमुपयुक्ताः प्रायः सर्वेऽपि प्राचीन विषयः वैदिकसाहित्ये वैदिकवाङ्मये वा वर्णिताः दृश्यन्ते । अतो हि 'वेदविद्या' समस्तप्राचीनविद्यानां निधानमिति नितरां स्पष्टीभवति ।

## २.२ वैदिकवाङ्मयस्य प्रकीर्णतमः चिन्तनपन्थाः ।

सर्वेऽपि विद्वांसः जानन्ति यत् जगदिदं त्रिगुणात्मकं वर्तते । तदनुसारं समेषां मानसमपि त्रिधाराभिः संवलितमस्ति । यावत् प्राकृतिकजगतः सम्बन्धोऽस्ति, तावत् तत् सत्वरजतमोऽवकीर्णं विद्यते । तत्र च तारतम्यं प्रतीयते । तेन हि कुत्रचित् सत्वस्य, कुत्रचित् रजसः तथा कुत्रचित् तमसः आधिक्यं दृश्यते, किन्तु स्वल्पबहुलमात्रया ते सर्वत्र विद्यमानाः भवन्ति । प्रकृतिचितिक्षेत्रस्य साम्यता प्रतिपाद्यते तर्हिकाण्डत्रयेषु ज्ञानं सत्वाश्रितं, कर्म रजः आश्रितमस्ति । उपासनायाः क्रियात्मकांशः कर्मणा सहास्ति, किन्तु स्वीयश्रद्धारूपेण तत् तमस निष्क्रियतया सम्बद्धं भवति । यथा श्रद्धायाः

आत्मसमर्पणे अहन्तुः प्रभावः दूरीभवति, तस्य निखिलकर्मजालस्य जननी वर्तते, तमस्यापितथैव शून्यत्वं अभावात्मकस्वां वा भवति । सारोऽस्ति यत् त्रिगुणसंवलितं निखिलं जगदिदं, काण्डत्रयेण युक्तमस्ति इति वैदिकसाहित्यस्य चिन्तनपथः आधारशिला वर्तते । अर्थात् वैदिकवाङ्मयस्य चिन्तनशैलीकाण्डत्रयाधारितास्ति । यथा -

*** ज्ञानकाण्डम् ।**

त्रयेषु काण्डेषु प्रथमं ज्ञानस्य स्थानमस्ति । वर्णमालायां 'अ' इति ध्वनिना संसूच्यते । प्रकाशे यथा अस्तित्वस्य भानं जायते, तथा हि ज्ञाने सति सतासु दृष्टिगमने एव तत् विज्ञातुमिच्छा प्रादुर्भवति । जिज्ञासा अस्यैव अभिधानमस्ति । ज्ञानस्य इच्छा प्रतिफलितायामेव ज्ञेयं ग्रहीतुम् अभिलाषा उत्पद्यते । ग्रहणं कर्मणः सूचकंवर्तते । ज्ञानक्रिययोः सम्मिलितं परिणामं उपासनायाः स्वरूपं वर्तते अत्रानन्दस्योपभोगः अथवा रसास्वादनमुपस्थितं विद्यते ।

ज्ञानस्य प्रकारद्वयमस्ति । (१) ब्रह्माण्डसम्बन्धं तथा (२) आत्मतत्वसम्बन्धम् । ब्रह्माण्डीयं ज्ञानं वयं विज्ञानं कथयितुं शक्नुमः, आत्मज्ञानं 'विशुद्धज्ञानं' संज्ञाद्वारा विजानीमः । ब्रह्माण्डं तया पिण्डं परस्परं प्रतिरूपमस्ति । अस्मदीयाः पूर्वजाः ब्रह्माण्डं विज्ञातुं पिण्डस्य अध्ययनं पर्याप्तमस्तीति स्वीकृतम । 'यत्पिण्डे तद ब्रह्माण्डे' ऐतरेयोपनिषत्कारेण समस्तकृतिषु 'पुरूषस्य' सर्वोत्कृष्टं स्थानं वर्तते इति स्वीकृतम् । 'पुरूषो वाव सुकृतम्' पुरूषः सर्वश्रेष्ठा रचना स्ति, कथं ? तत्र ब्रह्माण्डस्य सर्वांशाः विद्यमानाः सन्ति । सूर्य-चन्द्र-वायु-अग्नि-दिशा-अन्त-रिक्ष-द्यौ-भूम्यादीनां समेषांम् अंशावताररूपेण पुरूषस्य शरीरे विद्यमानाः भवन्ति । अतः यदि पिण्डस्य ज्ञानं सज्जातं, तर्हि समस्त ब्रह्माण्डस्य ज्ञानं भवितुं शक्यते ।

ज्ञानमिदं यदा वयं विज्ञानं कथयामः तदा तस्यार्थो भवति यत् विविधरूपतायाः ज्ञानम् । सृष्टिः विविधरूपास्ति, अयं प्रत्यक्षविषयः । अस्य विज्ञानं अस्मान् अस्याः रचयितारं प्रति नाययति । सृष्टौ मिहिता व्यवस्था तथा सप्रयोजनता, एतादृशस्य मस्तिष्कस्य सूचनां प्रददाति, यः सर्वज्ञः, नित्यः, सर्वशक्तिमान् चास्ति । आत्मज्ञानं समस्तविज्ञानस्य मूलस्थाने निवसति । आत्मा ज्ञानस्वरूपोऽस्ति । ज्ञानं प्रकाशोऽस्ति, किन्तु तत् भौतिकप्रकाशात् भिन्नं वर्तते । भौतिकप्रकाशः प्राकृतिकपदार्थानेव दर्शयति, नात्मानम् । कठोपनिषत्कारः यथा भाणति ।

न तत्र सूर्यो भाति न चन्द्र तारकं ने मा विद्युतो भान्ति
कुतोऽयमग्निः ।[1] (कठोपनिषत्)

आत्मप्रकाशस्य समक्षं सूयचन्द्रादितेजः गणनापात्रं नास्ति । ऋषिः कथयति –

'तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति' ॥

आत्मप्रकाशादेव भौतिकाः सूर्यादयः प्रकाशं लभन्ते उक्तिष्वेतासु द्वयोरपि प्रकाशयोः समरूपता ध्वन्यते, किन्तु वस्तुतः इत्थं नास्ति । द्वयोः महदन्तरं वर्तते ।

ज्ञानं प्रकाशोऽस्ति, परन्तु चाक्षुषप्रत्यक्षेण पृथगस्ति । तदहं मानसप्रत्यक्षं कथयितुं शक्नोमि । मानसिकता चेतनतायाः क्षेत्रमस्ति ।

'तन्मे मनः शिवसङ्कल्पमस्तु' इत्यादिषट्सु मन्त्रेषु मनसः विश्लेषणं

---

१. कठोपनिषत्

प्रस्तुतम् । एवं विज्ञानं ज्ञानं च द्वयोः दशयोः प्रकटनं विदधाति ।

सृष्टिविद्या, प्राणविद्या, आत्मविद्या, ऋग्वेदस्य अधमर्षणसूक्तं, पुरूषसूक्त, नासदीयसूक्तं, आस्यवामीयसूक्तं सर्वं सविशदं वर्णयति । सृष्टिविद्यायाः विविधाङ्गानां वर्णनमपि वेदे विहितमस्ति । जगति त्रीणि प्रकाराणि दृष्टिपथमागच्छन्ति, येषामुल्लेखः ऋचायां यथास्ति ।

दा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते । तयोरम्यः पिपालं स्वादु अत्रि अनश्नन् अन्यो अभिचाकशीति ।

बालादेकमणीयस्कं उत्तैकं नैव दृश्यते ।
ततः परिष्वजीयसां देवता सा ममप्रिया ॥

द्वौ सुन्दरौ उड्डयनकर्माणौ पक्षिणौ वर्तेते । परस्परं सयुजा सखायौ स्तः । द्वावपि एकस्मिन् तरौ आसाते । किन्तु एतयोरेकः वृक्षस्य फलं आस्वाद्य अश्नाति । अपरः पश्यति, साक्षिमात्रं वर्तते, किन्तु फलानि नाश्नाति ।

पक्षिणौ द्वाविमौ जीवपरमात्मानौ स्तः । संसारः वृक्षरूपेण वर्तते । जीवात्मा कर्माणि विदधाति, तथा च सुखदुःखरूपाणि प्राप्तफलानि भुङ्क्ते । परमात्मा वार्तायामस्यं पृथगस्ति जीवात् । स अनन्तर्मा भवन्नपि फलभोगद पृथक् वर्तते । जीवात्मा फलभोगे परमात्माधीनः वर्तते । प्रभुरेव न्याय व्यवस्थायां तस्मै फलदातास्ति । सः सर्वोपरि तस्योपरिन कोऽपि ।

समग्रब्रह्माण्डं प्रकृतिद्वारा हि निर्मीयते । प्रकृतिरेव तस्योपादानं कारणं वर्तते । परमात्मा निमित्तकारणम् । जीवात्मा यच्छरीरं लभते, तदपि प्रकृतिपरिणाममस्ति । शरीरं विलोक्यते, किन्तु जीवात्मा नावलोक्यते । तद्यथा –

अपाङ्प्राङ् एति स्वधया गृभीतो अमर्त्यो मर्त्येना सयोनिः ।
ता शश्वन्ता विषूचीमा वियन्तान्यन्यम्चिक्युः नतिचिक्युरन्यम् ॥

जीवात्मा प्रकृत्याश्रितः कदा नीचैः गच्छति, कदाच ऊर्ध्वम् । दुष्कर्मभिः, भोगवासनाभिः, कुत्सितकामनयातस्य पतनं सञ्जायते । सद्भावनाः, सत्संङ्कल्पश्चोर्ध्वं गमयति । यत्क्षणे जीवात्मा प्रकृतिं परित्यजति, या तदधितमनिकटा नास्ति । प्रभुश्च स दृश्यते, यतोऽधिकं समीपे न किमपि वस्तु वर्तते । तत्क्षणे सः मुक्तो भवति ।

द्वादशारम् नहि तज्जराय वर्वति चक्रं परिद्यामृतस्य ।
आपुत्रा अग्ने मिथुनासो अत्र सप्त शतानि विंशतिश्च त स्थुः ॥

परमात्मनश्च वर्णनमनेकेषु मन्त्रेषु प्राप्यते । यथा –

अनुत्तमा ते मधुवन्न किर्नुन त्वावां अस्ति देवता विदानः ।
न जायमानो नशते न जातो यानि करिष्या कृणुहि प्रवृद्ध ॥

प्रभुश्चैश्वर्यशाली वर्तते । प्रभोश्च गुणाः गुणान् मन्त्रेऽवलोक्यते ।

यथा – विद्माहि त्वा तुविकूर्मिम् तुविदेष्ठां तुवीमधम् ।
तुविमात्रमयोभिः ।

प्रभु अनन्तपराक्रमी, अनन्तदानी, अनन्तैश्वर्यशाली वर्तते । तस्य रक्षाशक्तयोऽनन्ताः सन्ति ।

अथर्ववेदे अध्यात्मसम्बन्धानि सूक्तानि सन्ति यानि त्रयोदशकाण्डान्तर्गतानि विधन्ते । यथा

सहस्राह्ष्यन् विद्यतौ अस्यपक्षौ हरेर्हसस्य पततः स्वर्गम् ।
सदेवान्त्सर्वान् उरसि उपर्दध सम्यश्यन याति भुवनानि विश्वा ॥

ऋग्वेदस्य दशममण्डलस्य ७१ सुक्तं ज्ञानकाण्डविवेचनस्य सर्वश्रेष्ठसूक्तं मन्यते । ऋग्वेदस्य स्तुतिषु पदार्थस्य गुणदोषविवेचनस्य ज्ञानमतीव चारूतयोपलभ्यते ।

यज्ञकर्मणि होता ऋग्वेदी, अध्वर्युः यजुर्वेदी, उद्गाता सामवेदी, ब्रह्माचाथर्ववेदी भवति । सूप्तस्यास्य मन्त्रमेकं यथोद्धृतं विद्यते ।

हृद्वा तष्टेषुमनसो जवेषु यद्ब्राह्मणाः संयजन्ते सखायः ।
अत्राह त्वं वि जहुर्वेद्याभि रोहब्रह्माणो विचरन्त्युत्वे ॥

ज्ञानस्य च संरक्षणं कर्तव्यम् । तस्य सङ्केतोऽपि प्राप्यते । यथा –

तन्तुं तत्वन् रजसो भानुमन्वि हि ज्योतिष्मतः पथोरक्षधिया कृतान् ।
अनुल्बणं वयत जोगुवामपो मनुर्भव जनया दैव्यं जनम् ॥

ज्ञानस्यास्य प्राप्तिः यैः साधनैः भवति, तद्यथा विज्ञायते –

वृतेन दीक्षामाप्नोति, दीक्षयाङऽप्नोति दक्षिणाम् ।
दक्षिणा श्रद्धामाप्नोति, श्रद्धया सत्य माप्यते ॥

एतादृशं निर्मलं पवित्रं ज्ञानं प्राप्तुं सर्वप्रथमं 'आस्माभिः व्रतं धारणीयम् । व्रती भूय दीक्षासमन्वितः भवितव्यः । दीक्षायाः अर्थोऽस्ति, समग्रोपयोगिसाधनानि अर्जितव्यानि, तेषान्य प्रावीण्यपूर्वकं प्रयोगः कर्तव्यः । अनेन ज्ञानमार्गेण वयं दूरपर्यन्तं अग्रे गन्तुं शक्नुमः, ज्ञेयञ्चात्मसात्कर्मं श्रद्धाबलम् अनिवार्यत्वेन अपेक्ष्यते । श्रद्धाभावात् किमपि नोपलभ्यते । श्रद्धैव सत्यं प्रापयति, तदुपलब्धिं च कारयति । अत एवोच्यते 'श्रद्धया सत्यमाप्यते' । श्रद्धैव अन्तिमं साधनमस्ति या सत्यज्ञानस्य साधिका विद्यते । अस्मदीयायां संस्कृतौ श्रद्धा एव सर्वोच्चं स्थानं भवति, या च ज्ञानस्य मूलं निर्विवादत्वेन विराजते तच्च निशङ्कम् ।

## (२) कर्मकाण्डम्

ज्ञानानन्तरं वैदिकचिन्तनपथि कर्मकाण्डः समागच्छति । कर्म च सकामं निष्कामञ्च द्विविधमस्ति । श्रेष्ठतमञ्च कर्म 'यज्ञकर्म' विद्यते । यज्ञस्यैव नाम इष्टिः । पुत्रेष्टिः सकामं भवति । मेघोऽपि यज्ञकर्म वर्तते । गोमेध वर्षा, कृषि तथा पशुरक्षणैः समबद्धं सकामञ्चास्ति । अश्वमेध-राजसूयादिकर्माणि सकामानि सन्ति । एतद्विपरीतं बलिवैश्वदेवः, अग्निहोत्रं, अतिथियज्ञ, सर्वमेधादयः निष्काममस्ति । यज्ञकर्ता ज्योतिर्मयलोकानामधिकारी भवति । लोकेऽस्मिन् तस्य यशःसौरभं विस्तीर्य परलोके आनन्द भुङ्क्ते ।

महान् असुवन्तो वधो, भूरि ज्योतींषि सुन्वतः ।

इह मनुष्यलोकः, पितृलोकः, देवलोकश्चास्ति । सन्तानेन प्रथम, शुभकर्मभिः द्वितीयं, ज्ञानेन च तृतीयंलोकमधिगच्छति । एषैव समस्त्- पुरूषार्थानां कर्मणाञ्च लीला विद्यते । ब्रह्मज्ञानं विद्यते, यज्ञ कर्मास्ति, द्वयोरनयोः मेलनेनैव लोकानां निर्माणं जायते । अर्थात् लोके यशोवर्धते, कीर्तिश्च विस्तरति । कर्म न स्यात्, यशोऽपि न भवेत् । जीवनं कर्मावलाम्बितमेवास्ति । वेदश्च निगदति । यथा -

कुर्वन्नेवेह कर्माणि जिजीविशेच्छतं समाः ।<br>एवंत्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नई रे ॥

कर्माणि कुर्वन् शतंवर्षाणि जीवितुमिच्छेत् । कर्माणां रेखा कर्मभिः छिद्यते । कर्माणि कुर्वन् कर्मभिः न लिप्यते ।

ज्ञानं सत्कर्मणः सहायकमस्ति । अज्ञानेन मनुष्यः अकर्म, कुकर्म यावत् गम्यते । अतएवोच्यते वेदे -

संश्रुनेन गमेमहि, स्तुतामया वरदा वदमाता, यत्र ब्रह्मश्च क्षत्रं च सम्यञ्चौ चरतः सह, पाकाय गृत्सो अमृतो विचेता, ताभ्या मृद्धस्य वेदमय कर्माणि कृण्महे, मंत्र श्रुत्यं चरामसि, सत्यस्य नावः सृकृतमपीपरन् आदि ।

दुष्कर्म पतनस्य कारणमस्ति । अतः तस्य निन्दा  निषेधकारकः मन्त्रः वेदेऽस्ति ।

न किर्देवा मिनीमसि न किं रायोपयामसि  ।

अन्यं आधातयितुं पूर्वं दुष्कर्म स्वकीयमेव अहितंकरोति, तद् शीघ्रातिशीघ्रं त्याज्यमस्ति ।

यश्चकार न शशाक कर्तुं शश्रे पादमङ्गुरिम् ।
चकारभद्रमस्मभ्यं आत्मने तपनं तु सः ॥

अत एवोच्यते । यथा – 'चकार भद्रम्' । तेन दुःखप्राप्तिकर्तुः अपि भद्रं भवति । कथम् ? प्रत्येकं कर्मभोगेन सह तस्य पुरातनं कर्मजालं नश्यति ।

ईर्ष्याया ध्राजिं प्रथमां प्रथमस्याः उतापराम् ।
अग्निं हृदय्यं शोकं तं ते निर्वापयामसि ॥

मानवतायाः विकासे षड् शत्रवः धोरबाधकाः सन्ति । शत्रूणामेतेषां दमनमेवाभीष्टंवर्तते । ये च शत्रवः सन्ति । यथा –

उलूकायातुं शुशुलूकयातुं जहि श्वयातुमुत कोकयातुम् ।
सुपर्णयातुमुत गृध्रयातुं दृषदेव प्रभृण रक्ष इन्द्र ॥

उलूकशुशुलूकश्वचक्रवालगुरूडादीनां पक्षिणां वर्तन्वद् मनुष्याणां कामक्रोधलोभमोहमत्सराभिमानानि मनुष्यत्वस्य आंतरिकशत्रव: सन्ति । यदस्मदीयस्यं मानवत्वं हन्ति । अत: एतेषां दमनमेवमुचितं वेदे दर्शितम् ।

दुष्कृतिभ्य: पृथक् स्थित्वा सत्कर्मसञ्चय एव धर्मपक्षा: संस्कृतपुरूषस्य लक्षणमस्ति । स्वस्तिमार्गश्च दानं, अहिंसा, ज्ञानानुकलम् आचरणमेव विद्यते । दिव्यशक्तिमि: प्रशस्तमार्गेन्मुख: जन: धर्मपरायणोभूत्वा समस्तदुरितान् पारमेति, सनीतिश्चयस्य योगिनी जायते तस्य नकोऽपि अनिष्टं कर्तुं शक्नोति विश्वेस्मिन् स एवाग्रे वर्धते, विस्तीर्णोभूत्वा नामकामं दिग्दिगन्तं यात् प्रसारयति । एतादृशोजन: इतरेषामादर्श: भवति । मानवतासंवर्धनम् अस्मादेव धर्मात्मपुरूषात् सम्भवति । भागवतोयथा कथितम् –

कर्मणा जायते जन्तु: कर्मणैव विलीयते ।<br>
सुखंदु:खं भयंक्षमं कर्मणैवाभिपद्यते ॥

इत्थं साररूपेण कथयितुं नितरां शक्यते यत् – मानवजीवनस्य साफल्यं कर्मयोगेन, कर्मकाण्डेन वैव प्राप्तुं शक्यते नि:सन्देहम् ।

**(३) भक्तिकाण्डम् (उपानाकाण्डम्)**

ज्ञानकाण्डेन, कर्मकाण्डेन, सह भक्तिकाण्डस्य मान्यता सृष्टिप्रारम्भादेवागच्छति । वयं सृष्टिविद्यां विजानीयाम, सत्कर्मभि: स्वस्योन्नयनं कुर्याम, आत्मज्ञानी भूत्वा परमप्रभौ तल्लीनं भवितुं प्रयत्नं कुर्याम । भक्ति–भावनायैव साधक प्रभो: समीपे गच्छति । भक्तिकाण्डम् अस्मान् स्मारयति, कथयति, स एव अस्माकं, मातापितृबन्धुधाताविधात्रादि सर्वं विद्यते । "न हि अन्यं षढाकरं मर्डितारं शतक्रणो । त्वंन इन्द्रमृडय ।"

हे प्रभो ! दु:खदग्धभक्तान् सुखदायक संस्कारेऽस्मिन् भवदतिरिक्तं न कोऽपि वर्तते । हे प्रभो ! त्वमेव अस्मान् सुखी कुरु ।

'यो नः शश्वत् पुराविथ अमृध्रो बाज सातये । सत्वं न इन्द्रमृडया ।' हे नाथ । कियती आयता जीवनयात्रास्ति । अस्यां यात्रायां का का पीडाः न समायाताः ? किन्तु प्रभो । वयं सदैव भवता रक्षिताः, यातनाः सोढुं बलमपि भवता प्रदत्तम्, भवता च क्लेश – बाहुल्यं विनाशितम् । प्रभो ! भवान्नेव अस्मान् सुखिनः करोतु, भवदधिकं सहायकः, सुखदातात्र कोऽस्ति ? "परिपूषा परस्ताद हस्तं दधातुदक्षिणम् । पुनर्नो नष्टमाजतु"

हे प्रभो । भवान् पुषास्ति । पोषणकर्ता विद्यते । जगतः समस्तस्मपदा भवत एवास्ति ।

तवेदिद मभितश्चेकिते वस्तृ

वसुर्वसूनं क्षयसि त्वमेकइत् द्यावा च यानि पृथिवी च पुष्यतः एवा वस्वः इन्द्रः सत्यः सम्राट् । भवता सम्पत्तिरियं, इयं अन्नपानस्य सामग्री जीवानां कल्याणार्थ प्रदत्तास्ति । इतोऽप्यधिकमग्रे ऋग्भिः प्रतिपाद्यते ।

इन्द्र प्रणोरथमेव पश्चाचित् सन्तमद्रिवः । पुरस्तादेनन्मे वृधि

हे इन्द्र । मम रथयात्रायां बहु अधिकं परिल्यरतमस्ति । किन्तु देवपानमारूहय भवान् अधिपतिः सञ्जात; अहञ्च अत्रैवास्मि । भवदीयम् अवलम्बनमिहे । भवदाश्रय एव मामग्रे गमयितुं शक्नोति ।

हन्तो नु किमाससे प्रथमनोरथंकृधि । उपमंवाजयुक्षवः ।

मदीयां प्रार्थनां श्रुत्वा मम रथं कथं नाग्रें गमयति ?

अवा नो वाजयुं रथं सुकरं ते किमित्परि

अस्मत् सुजिग्युषः कृधि ।

वैदिकसाहित्ये वैदिकसंस्कृतिः साधकं केवलं ज्ञानिमं वा कर्मकाण्डिनं भावयितु, निर्मातुं नाभिलषति, सा प्रभोः सद्भक्तः विधातुमिच्छति । अस्मदीयपूर्वजैः एकाङ्गिता न, अपितु समन्वयः स्वीकृतः । केवलं ज्ञानं मानवंजल्पाकं करोति, मात्रं कर्म दलदलस्य (पङ्कस्य) रूपंधरते, केवला भरितः (उपासना) मानवं अन्धीकरोति । भ्रमम् अज्ञानं वा दूरीकर्तुं, अग्रे गन्तुं, अन्तिमं लक्ष्यञ्च साधयितुं भक्तेः अवलम्बनं स्वीकरणीयमेव ।

सांस्कृतिकविकासः काण्डत्रयस्य समन्वयेनैव भवितुं शक्यते, एकैकस्य हस्तग्राहेन न । संस्कृतव्यक्तिः ज्ञानप्रकाशेन प्रोज्जवलः, कर्मपरिश्रमेण तेजोदीप्तः तथा भक्त्या–आत्मनिवेदनेन – आत्मसमर्पणेन अंसगः, निरहंकारः भूत्वा प्रभुप्रेम्णा परिप्लावितः सञ्जायते । सः प्रभोरेवासीत, प्रभोरेव जायते । वैदिकसंस्कृतेः साधनसमूहोऽयं स्वकीये सामञ्जस्ये समरसतायाः सम्पादकोऽस्ति, सर्वतोभावेन च स्वीकरणीयो विद्यते ।

इत्थं वैदिकवाङ्मयस्य अयं चिन्तनयन्थाः काण्डत्रयद्वारा सुचारूतया अवगन्तुं शक्यते । चिन्तनस्य मार्गोऽय अतीव विस्तीर्ण, प्रकीर्णः विद्यते, किन्तु ज्ञानकर्मोपसनात्मकेन काण्डत्रयविचारविमर्शेन सम्यकतया स्पष्टीभवति, यत् एतेषां परस्पर सुचारूसमन्वयेन मानवजीवनस्य नितरां साफल्यं भवेदेव निशङ्कम् । विषयोऽयं अतिगम्भीरः, विशालश्च, अपितु विस्तारस्य अपेक्षा नास्त्यितः इहैव समाप्यते ।

## २.३ वैदिकवाङ्मये सूक्तद्वारा तत्वदर्शनम्

वैदिकवाङ्मये कथावस्तुयुतं सूक्तसाहित्यं तत्वदर्शनयुक्तं समुपलभ्यते । तान्ययि पञ्चधा विभज्यन्ते । यथा –

(१) देवस्तुतिपरकसूक्तम्

(२) दार्शनिकसूक्तम्

(३) लौकिकसूक्तम्

(४) संवादसूक्तम्

(५) आख्यानसूक्तमादि

कानिचित् प्रमुखसूक्तानि यानि सर्वाधिकानि लोकप्रियानि महत्वपूर्णानि सन्ति, तेषां संक्षिप्तपरिचयः तस्याः संहितायाः व्यापकविषयमुपरि प्रकाशं प्रददाति ।

### (१) पुरूषसूक्तम् ।

ऋग्वेदसंहितायाः दशममण्डलस्य ९० संख्यकं सूक्तं 'पुरूषसूक्तम्' उच्यते, यतो हि तस्य देवता 'पुरूषः' वर्तते । अस्मिन् विराट्पुरूषस्य वर्णनमस्ति, तस्मात् जायमानायाः सृष्टेः विस्तरेण चर्चास्ति । अस्य पुरूषस्य सहस्रशीर्षाणिं, सहस्रपादाः सन्तीतीत्थं चित्रितम् । विश्वस्यास्य विविधाङ्गानि, चतुर्ष्णां वेदानामुत्पत्तिः दर्शिताः । सर्वप्रथमं चतुर्वर्णानां नामोल्लेखः ऋग्वेदस्य सूक्तेऽस्मिन्नेव मिलाति । सूक्तमिदं उदात्तभावनाया, विचारेण, रूपकात्मकशैल्या च अतिप्रसिद्धमस्ति ।

## (२) नासदीयसूक्तम् ।

ऋग्वेदसंहितायाः दशममण्डलस्य १२९ सूक्तं 'नासदीयसूक्तम्' वा 'भाववृत्तं सूक्तम्' कथ्यते । अस्मिन् सृष्ट्युत्पत्तेः पूर्वावस्थायाः चित्रणं वर्तते । यच्चान्वेषणस्य प्रयत्नः कृतोऽस्ति, यदा किमपि नासीत् तदा किमासीत् । तदा न सदासीत्, नापि असत । न रात्रिरासीत्, न दिनम्, केवलं तमसावृतं तमोऽभवत् ।

तदा सर्वप्रथमं ततत्वे कामः व्युत्पन्नः । तस्य सङ्कल्पोऽयं सृष्टेः नानारूपाणि अभिव्यनस्ति । किन्त्वन्ते सन्देहः कृतः यत् परव्योम्नि उपविष्टः एकः अध्यक्षः सर्वमेतत् जानाति वा न । यदि वा विजानाति, तदा स एव जानाति, कोऽपरः विजानीयात् ।

## (३) हिरण्यगर्भसूक्तम् ।

संहितायाः, अस्याः दशममण्डलस्य १२१ सूक्तं, 'हिरण्यगर्भसूक्तम्' उच्यते, कथं ? तर्हि अस्य देवता 'हिरण्य गर्भः' वर्तते । नवमन्त्राणां सूक्तेऽस्मिन् प्रत्येकमन्त्रेषु 'कस्मै देवाय हविषा विधेम' इदमुक्त्वा वार्तामिमां द्विरावृत्तास्ति, एतादृशं महनीयं हिरण्यगर्भं देवं विहाय अन्यस्य कस्याराधनां न कुर्वीत ।

अस्माकं कृते तु 'क' संज्ञक प्रजापतिरेव सर्वाधिकं पूजनीयमस्ति । अस्य हिरण्यगर्भस्य स्वरूपस्य, महिम्नः, तज्जनिष्पमाणायाः उत्पत्तेः विवरणं सूक्तेऽस्मिन् अतीव सरलैः स्पष्टशब्दैश्च विहितं विद्यते । हिरण्यगर्भ एव सृष्टेः नियामकः कर्ता चास्ति । इत्थं तात्विकं विवरणमिहोपलभ्यते ।

## (४) संज्ञानसूक्तम् ।

ऋग्वेदस्य दशममण्डलस्य १९१ तमं संख्यकं सूक्तं 'सञ्ज्ञानसूक्तम्' अभिधीयते । अस्मि अष्टमन्त्राः सन्ति, परन्तु ऋग्वेदस्य अप्रतिममन्त्राः, स्वोदात्तविचाराणां सांमनस्य सन्देशेन मानवीयसमानतायाः आदर्शं प्रस्तौति । वयं सम्मिल्य चलामः, सम्मिल्य वदामः, समानानि हृदयानि स्युः तथा एकता स्यात् । कामनेयं कस्यापि समाजस्य संगठनस्य वा कृते एकतासूत्रमस्ति ।

## (५) अक्षसूक्तम् ।

ऋग्वेदसंहितायाः दशममण्डलस्य ३४ तमं सूक्तं 'अक्षसूक्तम्' कथ्यते । इदमेकं लौकिक सूक्तं विद्यते । अत्र चतुर्दश मन्त्राः सन्ति । अक्षक्रीडायाः निन्दाकरणं, परिश्रमस्योपदेशश्च सूक्तस्यास्य सारोऽस्ति । एकस्य नीराशस्य द्युतकस्य दुर्दशायाः मार्मिकं चित्रणमिह कृतमस्ति; यः गृहस्य, पत्न्याश्च दुर्दशां विज्ञायापि अक्षक्रीडावशं भूत्वा तदाकर्षणं न परित्यजति। पुनश्च समेषाममानं सहते, स्वस्य च सर्वनाशं करोति ।

अन्ते सवित्रा देवतया सः नित्यं परिश्रमस्य, कृषिद्वारा जीविकोपार्जनस्य प्रेरणां प्राप्नोति ।

## (६) विवाहसूक्तम् ।

ऋग्वेदसंहितायाः दशममण्डलस्य ८५ तमं सूक्तं 'विवाहसूक्तम्' इति नाम्ना विज्ञायते । अथर्ववेदेऽपि विवाहस्य सूक्तद्वयं वर्तते । अस्मिन् 'सूर्यपुत्री' सूर्यायाः सोमस्य च विवाहस्य वर्णनमस्ति । अश्विनीकुमारौ विवाहे सहयोगस्य कार्यं कुरूतः । अत्र स्त्रियाः कर्तव्यानां सविस्तरेण वर्णनं कृतम् । तस्ये श्वसुरश्वश्चोः सेवां कर्तुं उपदेशः प्रदत्तः परिवारस्य कल्याणं तस्या कर्तव्यं

वर्तते । तथा तैः सह स्त्री गृहस्वामिनी, गृहपत्नी तथा साम्राज्ञी विद्यत इत्यपि कथितम् । अत एव स्त्री परिवारे आदरणीया दर्शितास्ति ।

## (७) मुख्याख्यानसूक्तानि

ऋग्वेदसंहितायां बहुषु सूक्तेषु कथाशैलीं मिलति तथा उपदेशस्य रोचकतायाः उदेश्यं प्रतीयते । कानिचित् प्रधानानि सूक्तानि येषु आख्यानस्य प्रतीतिर्जायिते । तानीत्थं सन्ति

(१) श्वावाश्रसूक्तम् (५/६१)

(२) मण्डूकसूक्तम् (७/१०३)

(३) इन्द्रवृत्रासूक्तम् (१/८०-२/१२)

(४) त्रिविक्रमसूक्तम् (१/१५४)

(५) सोमसूर्याविवाहसूक्तमक्त (१०/८५)

वैदिकाख्यानानां गूढार्थस्य व्याख्या विद्वद्भिः नैकैः प्रकारैः विहितास्ति ।

## (८) संवादसूक्तानि :

तानि सूक्तानि, येषु उपधिकदेवानां, द्वयोः वा, ऋष्योः, कयोश्चिदन्ययोः वा वार्तालापस्य शैल्या विषयः प्रस्तुतः विहितोऽस्ति प्रायः तानि संवादसूक्तानि कथ्यन्ते । कानिचित् प्रमुखानि संवादसूक्तानि इत्थं सन्ति ।

(१) पुरूरवा-उर्वशीसंवाद सूक्तम् - ऋग्वेद-१०/९५

(२) यमयमीसंवादः - ऋग्वेद-१०/१०

(३) सरमापणिसंवादसूक्तम् – ऋग्वेद–१०/१०८

(४) विश्वामित्रनदीसंवाद: – ऋग्वेद–३/३३

(५) वशिष्टसुदाससंवाद: – ऋग्वेद–७/८३

(६) अगस्त्यलोपामुद्रासंवादसूक्तम् – ऋग्वेद–१/१७९

(७) इन्द्र–इन्द्राणी–वृषाकपिसंवाद: – ऋग्वेद–१०/८६

संवादसूक्तानां व्याख्या, तात्पर्य वैदिकविदुषां एक: विचारणीयविषयोऽस्ति, कथं ? वार्तालापकर्ता केवलं जन:स्यादिति स्वीकारस्य सम्भव: नास्ति ।

आख्यानेषु एतेषु निहिततत्वै: उत्तरकाले साहित्यस्य कथानाटकादीनामुत्पत्ति: सञ्जाता । एतदतिरिक्तं आप्रीसूक्तं, दानस्तुतिपरकसूक्तं, आदीन्यान्यानि सूक्तान्यपि समुपभ्यन्ते शैलयामस्याम् ।

इत्थं ऋग्वेद: वैदिकदेवानां स्तुत्यतिरिक्तं दर्शनं, लौकिक ज्ञानं, पर्यावरणं, विज्ञानं, कथनोपकथनम् इत्यादिषु विषयेषु प्रकाशप्रदायक: प्राचीनतम: आर्षग्रन्थ: वर्तते ।

यदेत्थं वैदिकसूक्तानां सूक्ष्मेक्षिकया समालोचनं कुर्म:, तदा विज्ञातुं भवति यत् वैदिकवाङ्मये सूक्तानां स्थानं तत्वदर्शनेन सह सम्बन्धितं दृश्यते ।

यथा पुरूषादि देवस्तुतिपरकसूक्तेषु उदारविचारभावना, दार्शनिकसूक्ते जीवदर्शनं, संसारदर्शनं, लौकिकसूक्तेषु लोककल्याणभावना, संवादसूक्तेषु संवादद्वारा जीवनस्य रहस्यज्ञानं, आख्यानसूक्तेषु बोधकथैव ज्ञानं निहितमस्ति । तत्व ज्ञानमस्मिन् आधुनिकयुगे पूर्ववदेव आवश्यकतापूर्णं वर्तते ।

## २.४ वैदिकवाङ्मयेतरे गौणविषयाः ।

## २.४.१ वैदिकवाङ्मये षोडशसंस्काराः

'संस्कार' शब्दोऽयं सम् पूर्वक 'कृ' धातोः धञप्रत्ययं कृत्वा निष्पद्यते । संस्कारशब्दस्य प्रयोगः अनेकार्थेषु विधीयते । संस्कृतवाङ्मये अस्य प्रयोगः शिक्षा, संस्कृतिः, प्रशिक्षणं, सौजन्यपूर्णता, व्याकरणसम्बन्धिशुद्धिः, संस्करणं, परिष्करणं, शोभा, आभूषणं, प्रभावः, स्वरूपं, स्वभावः, क्रिया, फलशक्तिः, शुद्धिक्रिया, धार्मिकविधिः, विधानं, अभिषेकः, विचारभावना, धारणा, कार्यस्य परिणामः, क्रियायाः वैशिष्ट्यमित्यादिषु व्यापकार्थेषु क्रियते । अतः संस्कारशब्दः स्वोपविशेषार्थान् अभिव्यनक्ति । उक्ताः सर्वेऽपिअर्थाः शब्देऽस्मिन् समाहिताः । अतः संस्कारः शारीरिकी, मानसिकी बौद्धिकी शुद्धयर्थं क्रियमाणस्य अनुष्ठानस्य श्रेष्ठाचारः वर्तते । अनुष्ठानेनानेन कार्येण मनुष्यस्य बाह्याभ्यन्तरशुद्धि जायतेः यतः मानवः समाजस्य श्रेष्ठः आचरवान् नागरिकः भूयात् ।

हिन्दुसंस्कारेषु नैके वैचारिकाः धार्मिका विधयश्च सनिविष्टाः सन्ति । सविधिना संस्काराणामुष्ठानेन संस्कृतेः व्यक्तौ विलाक्षणाः अवर्णनीर्याः गुणाः प्रार्दुभवन्ति ।

"आत्मशरीरान्यतरनिष्ठो विहित क्रियाजन्योऽतिशयविशेषः संस्कार ।"[१]

वीरमित्रोदय पृ.१९१

'कार्यः शरीरसंस्कारः पावनः प्रेत्य चेह च' [२]

मनुस्मृति २/२६

संस्काराणां साङ्ख्यविषये शास्त्रीयप्रयोगसम्बन्धे च गृहयसूत्रमेव प्रमाणरूपेण स्वीकृतम् । प्राचीनगृह्यसूत्रेषु पारस्करगृह्यसूत्र, अश्वलायनगृह्यसूत्रं, बोधायनगृह्यसूत्रं विशेषरूपेण, प्रामाणिकत्वेन च संस्काराणामनुष्ठानानां विवरणं, महत्वं, मन्त्राणां विवरणञ्च प्रस्तौति । धर्मसूत्रेषु धर्मशास्त्रेषु अपि संस्काराणां समन्वितरूपेण प्रतिपादनं कृतम् । विभिन्नगृह्यसूत्रेषु स्मृतिष्वपि संस्काराणां साङ्ख्यविषये विमतैक्यंवर्तते, तदपि परवर्तिकाले संख्यानिर्धारणंविहितम् । संस्कारेष्वेतेषु जन्मपूर्वादरभ्य बाल्यावस्थायाः दशसंस्कारः षडन्ये शैक्षणिको संस्काराः अन्त्येष्टिपर्यन्तं परिगणिताः सन्ति । यथा -

१. गर्भाधान संस्कारः ।

२. पुंसवनसंस्कारः ।

३. सीमन्तोन्नयनसंस्कारः ।

४. जातकर्मसंस्कारः ।

५. नामकरणसंस्कारः ।

६. निष्क्रमणसंस्कारः ।

७. अन्नप्राशनसंस्कारः ।

---

१ वीरमित्रोदय पृ.१९१

२ मनुस्मृति २/२६

८.	चूडाकरणसंस्कारः ।

९.	कर्णवेधसंस्कारः ।

१०.	विद्यारम्भसंस्कारः ।

११.	उपनयनसंस्कारः ।

१२.	वेदारम्भसंस्कारः ।

१३.	केशान्तसंस्कारः ।

१४.	समावर्तनसंस्कारः ।

१५.	विवाहसंस्कारः ।

१६.	अन्त्येष्टिसंस्कारः ।

इत्थं संपेक्षेण संस्कारविषयकं मनुना 'जन्मना जायते शूद्रः संस्काराद्द्विज उच्यते' इदमुक्त्वा संस्कारमहत्वं प्रतिपादितम् । संस्कारदेव द्विजत्वं प्राप्यते । इदं वाक्यं आधारीकृत्य आर्यसमाजस्य अधिष्ठात्रा स्वामिदयानन्दसरस्वती महानुभावेन सम्पूर्णार्यजातिः द्विजत्वं कथं लभ्येत ? सिद्धान्तः प्रतिपादितोऽयम् । अतो हि अत्र षोडशसंस्काराः वैदिकवाङ्मये कथं वर्णिताः तदिदं प्रस्तूयते । यथा

## १. गर्भाधानसंस्कारः (प्राक्जन्मसंस्कारः)

गृह्यसूत्रे गर्भाधानेन सह संस्काराणां प्रारम्भो भवति । कथम् ? तर्हि जीवनस्य प्रारम्भः अस्माद् संस्कारादेव सञ्जायते । यथा –

निषिक्तो यत्प्रयोगेण गर्भः संधार्यते स्त्रिया ।[१]
तद् गर्भालम्भनं नाम कर्म प्रोक्तं मनीषिभिः ॥
(वीर मित्रोदय)

स्त्रीपुरूषयोः संयोगरूपेण संस्कारस्यास्य विस्तृता विवेचना शास्त्रेषूपलभ्यते यत्र च नैकेषां विधिनिषेधानां चर्चा विद्यते यत् मानवजीवनस्य कृते तथा आगमिसंततिपरम्परायाः शुद्धयर्थं अतीव महत्वपूर्णं वर्तते । दिव्यसन्ततिप्राप्त्यर्थं शास्त्रीयप्रयोगाः फलन्ति, सन्ततिनिगृहोऽपि भवति ।

## २. पुंसवनसंस्कारः

गर्भधारण निश्चयानन्तरं शिशोः पुंसवननामकेन संस्कारेण अभिषेकः विधीयते । अस्याभिप्रायोऽस्ति पुं-पुमान् (पुरूषरूप) सवन (जन्म) भवेत् ।

पुमान् प्रसूयते येन कर्मणा तत् पुंसवनमीरितम् ।[२]
(वीरमित्रोदय)

गर्भधारणात् तृतीयमासात् चतुर्थमासपर्यन्तम् अस्य संस्कारस्यय विधानं दर्शितमस्ति । अधिकांशाः स्मृतिकाराः तृतीयमासमेव गृहणन्ति ।

तृतीये मासि कर्तव्यं गृहेरन्यत्राशोभनम् ।[१]
गृहे चतुर्थमासे तु षष्ठे मासेऽथवाष्टये ॥
(वीरमित्रोदय)

संस्कारोऽयं चन्द्रमस्य पुरूषनक्षत्रस्थितावेव कर्तव्यः । सामान्यतः

---

१ वीरमित्रोदय

२ वीरमित्रोदय

गणेशार्चनादीन कृत्वा गभिण्या: स्त्रिया: नासिकाया दक्षिणछिदे यथेदं करणीयम् ।

"सुलक्ष्मणा–वटशुङ्रग, सहदेवी विश्वदेवानाभिमन्यतमं [२]
क्षीरेणाभिद्युष्टय त्रिचतुरो वा विद्वान दद्यात् दक्षिणनासापुटे"
– सुश्रुतसंहिता

उपर्युक्तप्रक्रियया नितरां सिद्धयति यत् – संस्कारेऽस्मिन् वैज्ञानिकविधे: आश्रयोऽस्ति, यतो हि शिशो: पूर्णत्वं, सर्वाङ्गरक्षणंञ्च स्यात् ।

**३. सीमन्तोन्नयनसंस्कार: ।**

गर्भस्य तृतीय: सीमन्तोन्नयनसंस्कारोऽभवत् । संस्कृारेऽस्मिन गर्भिणिस्त्रिया: केशान् (सीमन्तान्) ऊर्ध्वीकरणं" सीमन्त उन्नीयते यस्मिन् कर्मणि तत् सीमन्तोन्नयनम् – वी.मि.

कस्मिन्नपि पुंनक्षत्रे स्थिते स्त्रीपुरूषयो: फलाहारं विधाय विधिरयं सम्पन्नो भवति । गणेशार्चनादि कृत्वा अग्ने: पश्चिमासीनाया: पत्न्या: पति: गूलरस्य फलानां गुच्छेन, कुशेन, 'साही' इत्यस्य कष्टकै: केशान संवरति महाव्याहृतो: उच्चरन् ।

'अयभूर्ज्जस्वतोवृक्षऊर्ज्जेव फलिनीभव' (पा.गृ.सूत्र)
अस्मिन् प्रसङ्गो मङ्गलगानं, ब्राह्मणभोजनमादिपद्धति: वर्तते ।

---

१ वीरमित्रोदय पृ.

२ सुश्रुतसंहिता पृ.

**४. जातकर्मसंस्कारः ।**

जातकस्य जन्म ग्रहणानतरं पिता पुत्रस्य दर्शनं कुर्यात् तत्पश्चात् नान्दीश्रद्धावसानजातकर्मविधिः सम्पन्नः क्रियेत ।

जातं कुमारं स्वं दृष्ट्वा स्नात्वाऽनीय गुरूं पिता ।
नान्दी श्राद्धावसाने तु जातकर्म समाचरेत् ॥

<u>विधानम्</u>

पिता स्वर्णशलाकया, चतुर्थाङ्गुल्या वा जातकस्या जिह्वोपरि मधु धृतञ्च महाव्याहृतीः उच्चारयन् लिहयेत् । गायत्रीमन्त्रेण सह धृतबिन्दुं मोचयेत् । आयुर्वेदस्य ग्रन्थेषु जातकर्मविधेः विधानं चर्चितमस्ति, पिता जातकस्य कर्णे दीर्धायुष्यमन्त्रान् जपेत् । अवसरेऽस्मिन् लग्नपत्र निर्माणस्य, जातकस्य नक्षत्रस्थितिः विज्ञातव्या भवति । तत्पश्चात् बालकस्य भाविसंस्काराः निश्चिताः क्रियन्ते ।

**५. नामकरणसंस्कारः ।**

नामकरणमतीव महत्वपूर्णसंस्कारोऽस्ति, जीवने व्यवहारस्य सम्पूर्णाधारः नामोपरिवर्तते ।

नामाखिलस्य व्यवहारहेतुः शुभावहं कर्मसु भाग्यहेतुः ।
नाम्नैव कीर्तिं लभेत मनुष्यस्ततः प्रशस्तं खलु नामकर्म ॥[१]
वी.मि.भा.१

उपर्युक्तेन स्मृतिकारस्य बृहस्पतेः वचनात् प्रमाणितमस्ति व्यक्तिसञ्ज्ञायाः जीवने सर्वाधिकं महत्वंवर्तते । अतः नामकरणंसंस्कारः हिन्दुजीवनेऽतीव महत्वमस्ति । शतब्राह्मणोल्लेखोऽस्ति ।

१ वीरमित्रोदय भा.१

तस्माद् पुत्रस्य जातस्य नाम कुर्यात
पिता नाम करोति एकाक्षरं द्वक्षरत्रयक्षरम्
अपरिमिाक्षरम् वेति[१] –

(वीरमित्रोदय...)

द्वयक्षरं प्रतिष्ठाकामश्व्रतुरक्षरं ब्रह्मवर्चस कामः ।

महाभाष्यकारस्य पतञ्जलेः मतं यथा –

''याज्ञिकाः पठन्ति –''दशम्युतरकालं जातस्य नाम विदध्यात् घोषवदाद्यन्तरन्तस्थमवृद्धं त्रिपुरूषानुक्रमनरिप्रतिष्ठितम् ।''[२] (व्या.महाभाष्य)

बुद्धि प्रतिष्ठितमं भवति । द्वारं चतुरक्षरं वा नाम कुर्यात् न तद्धितम् । न चान्तरेण व्याकरणकृतस्तद्धिता वा शक्या विज्ञातुम् ।[३]

महाभाष्य

विधिविधानं गृह्यसूत्राणां नियमानुसारं नामकरणं कृत्वा पश्चात् दशमद्वादशमदिने सम्पन्नं क्रियेत ।

द्वादशाहे दशाहे वा जन्मतोऽपि त्रयोदशे ।
षोडशैकोनविंशे वा द्वात्रिंशेषवर्षतः क्रमात् ॥

जनन्याः अङ्के पूर्वाभिमुखबालकस्य दक्षिणकर्णे गृहस्य महाजनाः पूजितनामानि श्रावयेयुः । हे शिशो ! तव नाम अमुकशर्मा, वर्मा गुतदासाद्यस्ति'' आशीर्वचनानि निम्मरीत्या पठेत् ।

---

१ वीरमित्रोदय

२ व्या.महाभाष्य

३ महाभाष्य

''वेदोऽसि ये न त्वं देव वेद देवेभ्यो वेदोभरत्तेन महयां वेदो भूया: । अङ्गादङ्गात्संभवसि हृदयादधिजायते आत्मा वै पुत्रा नामासि सद्द्रजीव शरद: शतम् ।'

बालिकानां नामकरणस्य तद्धितान्तस्य विधानं वर्तते । तासां नामानि आकाराम्तानि ईकारान्तानि वा स्यु: ।

स्त्रणां च सुखमक्रुरं विस्पष्टार्थं मनोहरम् ।
मत्ल्यं दीर्धवर्णान्तमाशीवादाभिधानवत् ॥

**६. निष्क्रमणसंस्कार: ।**

प्रथमवार शिशो: सूर्यदर्शनं निष्क्रमणसंस्कार: कथ्यते ।

ततस्तृतीये कर्तव्यं मासि सूर्यस्य दर्शनम् ।
चतुर्थे मासि कर्तव्य शिशोश्चन्द्रस्य दर्शनम् ॥

तत: बालकस्य निरन्तर बहिर्निष्क्रमणस्य क्रम: प्रारभ्यते । पिता च बालकस्य सूर्यदर्शनं कारयेत् ।

ततस्त्वलंकृता धात्री बालकादाय पूजितम् ।
बहिर्निष्कासयेद गेहात् शङ्ख पुण्याहनि: स्वनै: ।

आशीर्वादाँश्च दद्यात् ।

अप्रमतं प्रमतं वा दिवारात्रावथापि वा ।
रक्षन्तु सततं सर्वे देवा: शक पुरोगमा: ॥

## ७. अन्नप्राशनसंस्कारः ।

विधिपूर्विका बालकस्य प्रथमभोजनस्य प्रथा अतीव प्राचीनास्ति । वेदेषूपनिषत्वस्वपि एतत्सम्बन्धिनो मन्त्राः उपलभ्यन्ते । मातुः दुग्धपोषितस्य बालकस्य प्रथमान्नप्राशनस्य विधानं प्रायः प्राचीनकालादेव विशेषोत्सवरूपेण सम्पद्यते स्म ।

जन्मतो मासि षष्ठे स्यात सीरेणोत्तममन्नदम् ।
तदभावेऽष्टमे मासे नवमे दशमेऽपि वा ॥

द्वादशे वापि कुर्वीत प्रथामान्नाशनं परम् ।[१]
संवत्सरे वा सम्पूर्णे केचिदिच्छन्ति पण्डिताः ॥

नारद वी.मि.

षण्मासदप्रचैनमन्नं प्राशयेल्लघु हितञ्च [२]

सुश्रुत (शं.स्थान)

भोजनं स्वादिष्टं स्यात् । मधु–धृत–पायसैः बलकाय प्रथमगासं दद्यात् । इत्थं विधिपूर्वकं संस्कारं कुर्वीत ।

## ८. चूडाकरणसंस्कारः

मुण्डनसंस्कारस्य सन्दर्भ वैदिकानामृचां, गृहयसूत्राणां स्मृतिमन्त्राणां, विविधप्रयोगस्य, समयनिर्धारणस्य सम्बन्धे विस्तृतचर्चा प्राप्यते । मुण्डने विधिपूर्वकं शास्त्रीपाचारं केवलं उपनयनकृतृषु कुलेषु तत्समय एव संस्कारोऽयं क्रियते, किन्तु शास्त्रीयविधानं पृथमस्ति फ प्राङ्वासवे सप्तमे वा सहोपनयनेन वा

(अश्वलायन)

१ नारदवीरमित्रोदय

२ सुश्रुत (शं.स्थान)

तृतीये वर्षे चौलं तु सर्वकामार्थसाधनम् ।

सम्बत्सरे तु चौलेन आयुष्यं ब्रह्मवर्चसम् ॥

पद्प्रचमे पशुकामस्य युग्मे वर्षे तु गर्हितम् ।

निषिद्ध काल–गर्भिण्यां मातरि शिशोः क्षौरकर्म न कारयेत् । एतदतिरिक्तं मुहूर्तनिर्णये समये निषिद्ध–कालाः त्याज्यः ।

**शिखायाः व्यवस्था**

मुण्डने सत्यपि शिखायाः विधानं, वैज्ञानिकं वर्तते । शास्त्रेषु शिखाहीनत्वस्य गम्भीरं प्रायश्चितमस्ति । यथा –

शिखा छिन्दन्ति ये मोहात् द्वेषदज्ञानतोऽपि वा ।

तप्तकृच्छ्रेण शुध्यन्ति त्रायो वर्णा द्विजातयः ॥

महत्वामिदं यथा यत्स्थाने शिखा मस्तके भवति, तत्र प्रहारे सति तत्कालमृत्युः भवितुं शक्यते । तत्कोमलाङ्ग रक्षणं शिखा द्वारा भवति । यथा –

मस्तकाभ्यन्तरोपरिष्टात् शिखासम्बन्धिसन्निप्रापातो

रोमावर्तोऽधिपतिस्तत्रापि सद्यो मरणम्[१]–

सुश्रुत श. स्थान

एतदवसरे पूजोपचारान् विधाय गोमयउधिरतितजलोष्णजलाक्तकेशान् कर्तयेत् । यथा –

बल यत क्षुरेण मज्जयता सुपेशसाववा वापयति ।

केशादिद्रछन्धिशिरो माऽस्यायुः प्रमोषी ॥

---

१ सुश्रुत रा.स्थान

अक्षण्वं परिवप ॥

येना वपत् सविता क्षुरेण सोमस्य राज्ञो वरूणस्य विद्वान् ।

तेन ब्रह्मणो वयतेदमस्यायुष्यं जरदष्टिर्ययासत् ।

येन भूरिश्वस दिवंज्योक् च पश्चाध्टि सूर्यम् । तेन ते

वपामि ब्रह्मणाजीवातवे जीवनाय सुलोक्वाय स्वस्तये ॥

## ९. कर्णवेध संस्कार:

आभूषणधारणस्य पद्धति: विभिन्नाङ्गानां [१]

छेदनस्य प्रथा सम्पूर्ण संसारस्य असभ्यासु, अर्धसभ्यासु जातिषु प्रचलितास्ति । अस्योद्भव प्राचीनकालादेवाभवत् ।

आभूषणधारणस्य तथा वैज्ञानिकरूपेण कर्णछेदनस्य महत्वमस्ति, अत: प्रक्रियेयं संस्काररूपेण स्वीकृतास्ति । सुश्रुतमतं यथा –

शङ्खोपरि च कर्णान्ते त्यक्त्वा यत्नेन सेवमीयम् ।[२]

व्यत्यासाद्वा शिरां विध्येद् अन्त्रावृद्धि निवृत्तये ॥

सुश्रुत श.स्थान

मधरभोजिन: बालकस्य संस्कारं: नैपुण्येन क्रियेत । बृहस्पतिमनोनुसार संस्कारस्यास्य काल: जन्मत: १०–१२–१६ दिवसे भवेत् ।

विधि विधानवर्तमामबालिकानां कर्णवेध: भूषणधारणार्थं अनिवार्यत्व भवेत । किन्तु पुरूषवर्गस्य प्रतीकात्मक: संस्कारोऽस्ति ।

---

१ हिन्दूसंस्कार पृ.१२९

२. सुश्रुत श.स्थान चि.

## १०. विद्यारम्भ (अक्षरारम्भ) संस्कारः ।

महत्वपूर्ण संस्कारस्यास्य सम्बन्धे गृह्यसूत्रेषु अधिक स्पष्टोल्लेखः न मिलति, न च कस्यचित् विधिविधानस्य चर्चा भवति । किन्तु अनेकाकारग्रन्थेषु, काव्येषु, नाटकेषु अस्योल्लेखः भवति । कौटिल्यस्य अर्थशास्त्रेषु, रघुवंशे, उत्तररामचरिते अदिषुचर्चास्ति ।

उत्तरायणसूर्ये गते शुभमुहूर्ते गणेशसरस्वतीगृहदेवताः समर्च्य गुरूणा अक्षरारम्भः विधीयते ।

"द्वितीय जन्मतः पूर्णमारभेदक्षरान् सुधी ॥"
"प्रद्व्रचमे सप्तमेवाद्वे "[१]

संस्कारप्रकाश

श्री गणेशाय नमः, श्री सरस्वत्यै नमः, गृहदेवताभ्यो नमः मन्त्रानिमान् विलिख्य, सम्पूज्य, गुरूपूजनं विधाय बालकस्य दक्षिणहस्तमहाय पट्टिकामुपरि अक्षरारम्भः क्रियेत । गुरूवे दक्षिणाञ्य दधात् ।

## ११. उपनयनसंस्कारः ।

भारतीयमनीषिभिः मानवानां समग्रजीवनस्य रचनार्थं आश्रमव्यवस्था स्थापिता यत्र पुरूषार्थचतुष्टयस्य प्राप्तिः भवेदिति प्रतीवते । गर्वफामोभोगोऽपि भवेत् इति गीताशब्देषु दृश्यते । यथा –

"धर्माविरूद्धो भूतेषु कामोऽस्मि भरतर्षभ ।"

धर्मनियन्त्रितैः धर्मतत्वैः मनुष्यः दीक्षितः स्यात् तदनन्तरं मोक्षप्राप्तिः लक्ष्यं सिद्धयेत् । चरमलक्ष्यं मोक्षोपलब्धिः भवेत्तत्र यौवनकालाभ्यस्तधर्मः

१ संस्कारप्रकाश

सहायको भवति । इत्थं पुरूषार्थचतुष्टयम् आश्रमचतुष्टयञ्च द्वयमपि अन्योन्याश्रितं, आधाराधेयभावेन सम्बद्धं वर्तते ।

वर्तमानयुगे उपनयन संस्कार: प्रतीकात्मकरूपेण दृश्यते । बहुसङ्ख्यकेषु परिवारेषु विवाहात् प्रागेव उपनयनसंस्कार: विधीयते । किन्तु गृहयसूत्रेषु विभन्नवर्णानां कृत आयु:सीमा निर्धारितास्ति ।

ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पद्द्रचमे ।[१]

राज्ञो बलार्थिन: षष्ठे वैश्यस्येहार्थिनोऽष्टमे ॥

मनुस्मृति २, ३७

सप्तदशशताब्धा: निबन्धकारा: परिस्थित्यनुरूपं ब्राह्मणस्य २४, क्षत्रियस्य ३३ वेश्यस्य च ३६ वर्ष यावत् उपनयनसंस्कार: स्वीकुर्वन्ति ।

वास्तवे यज्ञोपवीतस्य सूत्रधारणं व्रतबन्धं कथ्यते । सूत्रधारणं कारयित्वा उत्तरीयस्थापनस्य अनिवार्यत्व प्रदर्शितम् अस्ति ।

विधिविधानञ्च संस्कारसम्बन्धिता: प्रान्तीया:, विभिन्नसाम्प्रदायिका: उपनयनपद्धतय: प्रचुरतया प्राप्यन्ते । तदनुसारमाश्रित्य संस्कारस्य संयोजन सम्पादयेत् ।

## १२. वेदारम्भसंस्कार:

वेदारम्भ: उपनयनसंस्कारादनन्तरं क्रियामाणं प्रतीकात्मकरूपेणं विद्यते । वस्तुत: मुख्यरूपेण संस्कारोऽयं वेदानां विभिन्नशाखानां रक्षणार्थं तदभ्यासस्य परम्परया सम्बद्धी भवति । स्वीयस्य कुल परम्परानुसारं वेदस्य, शाखासुत्रादे:

---

१ मनुस्मृति–२/३७

स्वाध्यायस्य पद्धतिः आसीत् । या अनिवार्यरूपेण द्विजातिभिः अभ्यासः करणीयोऽभवम् ।

कालान्तरे पद्धतिरियं लुप्ता जाता कुलपुरोहितं यावत् सीमिता जाता, यतः वेदस्य नैकशः शाखाः नोपलभ्यन्ते । महर्षिपतञ्जलिमहाभाष्यचर्चानुसारं नेकाः सूत्रशाखाः लुप्ताः अभवन् ।

वर्तमानपद्धतिषु चतुर्वेदानां मन्त्राः संग्रहीताः सन्ति । उपनयनान्तरं सावित्री–सरस्वती–लक्ष्मीगणेशान् सर्मच्य उपनीतबदून औपचारिकरूपेण उच्चारणमात्रं शिक्षयेत् । अतः संस्कारोऽयं उपनयनस्याङ्गभूतभागः सञ्जातः ।

## १३. केशान्त संस्कारः

केशान्तस्य अर्थः, दीर्धाविधिं यावत् केशधारकस्य युवब्रह्मचारिणः केशवपनम् । विधिपूर्वकं मन्त्रोत्त्चारणेन सह, गोदानेन सह समपन्नो भवति । संस्कारादस्मादनन्तरं 'युवकाय' गृहस्थजीवनाय योग्यशारीरिक् याः, व्यावहारिकयोग्यतायाश्च दीक्षा प्रदीयते ।

## १४. समावर्तनसंस्कारः ।

समावर्तनस्य अर्थोऽस्ति विद्याध्ययनं सम्प्राप्य ब्रह्मचारियुवकस्य गुरूकुलात गृहं प्रति प्रत्यावर्णनम् ।' यथा –

'तत्र समावर्तनं नाम वेदाध्यमनान्तरं गुरूकुलात् स्वगृहागमनम् ।'

वीर मित्रोदय

आजीवनब्रह्मचारिणाञ्च व्यवस्था विष्णुस्मृतौ प्राप्यते ।

कुब्जवामनजात्यन्धक्लीब पङ्ग्वार्तरोगिणाम् ।[1]
व्रतचर्या भवेत्तेषां यावज्जीवमनंशतः ।

(विष्णुस्मृति)

समावर्तनसंस्कारः गृहस्थजीवनस्य प्रवेश सम्मतिं प्रयच्छाति । युवभ्यः गार्हस्थ्यजीवनं जीवितुं शिक्षां प्रददाति । सः युवा 'स्नातक' लभते । स्नातकस्य त्रयः प्रकाराः सन्ति स्म । (१) विद्यास्नातकः (२) व्रतस्नातकः (३) विद्याव्रतस्नातकश्च । वर्तमानसमये १०-१२ वर्षीयस्य बालकस्य उपनयनसंस्कारादन्तरं सद्य एव समावर्तनाधिकारी विधीयते ।

आश्रमहीनेन वास्तव्यं दोषपूणमस्ति । समावर्तनात् पश्चात् गृहस्थिभावः, अथ च दारपरिग्रहः अपरिहार्यमस्ति, अन्यथा प्रायश्चितं विधेयम् ।

अनाश्रमी न तिष्ठेच्य क्षणमेकमपि द्विजः ।[2]
आश्रमेण विना तिष्ठन् प्रायश्चितीयते हि सः ॥

(दक्षस्मृति)

उपर्युक्तं विवरणं समावर्तनसंस्कारस्य महत्वपूर्णाम् आचारप्रक्रियां प्रस्तौति । यतः संस्कारितः दीक्षितः युवा श्रेष्ठगृहस्थंस्य योग्यतां प्राप्नोति । अस्य विधानम् उपनयनसंस्कारपद्धतिभिः यथासम्पादनीयम् ।

---

१ विष्णुस्मृति

२ दक्षस्मृति

## १५. विवाहसंस्कार:

विवाहसंस्कार: हिन्दूवैदिकसंस्कारपद्धते: अतीव महत्वपूर्ण: संस्कार: वर्तते । प्राय: समस्तसम्प्रदायेषु महत्वपूर्णमस्य स्थानं विद्यते । विवाशब्दस्य तात्पर्य स्त्री–पुरूषयो: मैथुनसम्बन्धंयावत् परिमित: नास्ति, अपितु सन्तानोत्पादनेन सह सनतानं सक्षमम् आत्मनिर्भरं भावयितुं, दायित्वनिर्वाहं विधातुं, शिक्षांप्रदातुञ्च संस्कारस्यास्य अङ्गं वर्तते । शास्त्रेषु अविवाहित: अयज्ञीय: कथित, स च सर्वाधिकाराणां अयोग्य: ।

अयज्ञियो वा एष योऽपत्नीक: – वे.प्रा. ।

मनुष्य:जनमग्रहणादेव त्रिभि: ऋणै: युक्तो भवति । (१) ऋषिऋणम् (२) देव ऋणं (३) पितृऋणञ्च ।

जायमानो ह वै ब्राह्मणस्त्रिार्ऋषवान् जायते ब्रह्मचर्येण[१]

ऋषिभ्यो यज्ञेन देवेभ्य: प्रजया पितृभ्य: ।

तैत्तरीयसंहिता – ६/३

गृहस्थाश्रम: समेषामाश्रमाणामाश्रमोऽस्ति ।
यथा वायुं समाश्रित्य वर्तन्ते सर्वजन्तव: ।
तथा गृहस्थमाश्रित्य वर्तन्ते सर्व आश्रमा: ॥
यस्मात् त्रायोऽप्याश्रमिणो ज्ञानेनान्नेन चान्वहम् ।
गृहस्थेनैव धार्यन्ते तस्मा जयेष्ठाश्रमो गृही ॥[२]

मनुस्मृति – ३

१ तैत्तरीयसंहिता–६/३

२ मनुस्मृति–३

**विवाहे मतम्**

त्रायाण्यमानुलोम्यं स्यात् प्रातिलोम्यं न विद्यते ।
प्रातिलौम्येन यो याति न तस्मात् पापकृत्तरः ॥
अपत्नीको नरो भूप कर्मयोग्यो न जायते ।
ब्राह्मणः क्षत्रियो वापि वैश्यः शूद्रोऽपि वा नरः ॥

**विवाहस्य प्रकाराः**

प्राचीनकालादेव यौनसम्बन्धे वैविध्यवृत्तस्य प्राचुर्यं प्राप्यते । स्मृतिभिः इत्थं विवाहः अष्धा विभक्तः ।

(१) ब्राह्मः (२) दैवः (३) आर्षः (४) प्राजापत्यः (५) आसुरः (६) गान्धर्वः (७) राक्षसः (८) पैचाशः ।

एतेषु प्रकारेषु प्रथमचत्वारः प्रश्स्ताः, अरचत्वारः अप्रशस्ताः सन्ति । प्रथमचतुर्षु ब्राह्मणविवाहः, सर्वोत्तमः समाजे प्रशंसनीयः आसीत्, शेषाः ग्राह्याः आसन् । किन्तु द्वौ सर्वथा अग्राह्यावास्ताम् ।

**अप्रशस्त निन्दनीयः**

(१) पैशाचः

सुप्तां, कृन्दितां कन्यां बलात् अपहरणम् ।

(२) राक्षसः

अभिभावकान् आक्रम्य बलात् विगृह्य क्रन्दनशीलां कन्यामपहत्त्य नयनम् । अयं निन्दनीयः विवाहः आसीत्

(३) गान्धर्वः

यदा कन्या वरः  कामवशं भूत्वा स्वेच्छापूर्वकं परस्परं संयोगं करोतिं । एतत्विवाहः गान्धर्वविवाहौ भवति ।

(४) यस्मिन् विवाहे कन्यापक्षाय धनसम्पत्तिं प्रदाय स्वच्छन्दतापूर्वकं कन्यया सह कृतविवाहः आसुरसञ्ज्ञकः ।

(५) परः स्वयं प्रस्तावं विधाय कन्यायाः पितुः समीपे निवेदं कुर्वन्, सन्तानोत्पादनाय विवाहं स्वीकरोति । विवाहोऽयं प्राजापत्यकोटिनोऽभवत् ।

(६) आर्षः

आर्षविवाहे कन्यायाः पिता यज्ञादिकर्मणि द्वे गोमिथुनं सम्प्राप्य धर्मकार्यं समाप्नोति । तद्धर्मकार्यान्ते कन्यादानम् अकरोत् ।

(७) दैवविवाहः

कस्यापि सेवाकार्यक्य (विशेषेण धर्मानुष्ठानस्य) मूल्यरूपेण स्वकन्याया दानमेव 'दैवविवाहः' कथ्यते ।

सङ्क्षेपेण विवाहसंस्थायाः उद्देश्यान् तत्प्रकारान् च यथोल्लेखितवाली । विवाह विविधविधानानि देशकालप्रान्तभेदन पद्धतयश्चोपलभ्यन्ते, तदनुरूपं वैवाहिकसंस्कारः सम्पन्नः विधीयते ।

## (१६) अन्त्येष्टिसंस्कार:

हिन्दुजीवन वैदिकसाहित्ये च संस्कारेषु अन्त्येष्टि: ऐहिकजीवनस्य अन्तिमाध्यायोऽस्ति । हिन्दुजीवनं, वैदिकवाङमयञ्च आत्मन: अमरत्वं, परलोकविश्वासत्वं स्वीकरोति । अत: इहलोकापेक्षया पारलौकिककल्याणस्य सततं कामयते । मरणोत्तरसंस्कारादेव पारलौकिकविजयं प्राप्यते । यथा

जात संस्कारेणेमं लोकमभिजति ।१

मृतसंस्कारेणामुं लोकम् –

वीरमित्रोदय – ३–१

विधिविधाने आतुरकालिकदानं, वैतरणीदानं, मृत्युकाले भूरायनव्यवस्था, मृत्युकालिकस्नानं, मरणोत्तरस्नानं, पिण्डदानं, दशगात्रायावत् तिलाञ्जलि:, घटस्थापनं, दीपदानं, पिण्डदानं एकादशाहद्वादशाहाद्विषोउशश्राद्ध:, विष्णुपूजनं, शय्यादानम् आदि । एतत्सर्वकार्यार्थं प्रान्तदेशकालानुसारं पद्धतय: उपलभ्यन्ते, तदनुसारं तत्कर्मणामायोजनं विधातव्यम् ।

## २.४.२ वैदिकवाङ्मये आयुर्विज्ञानम् ।

वैदिकवाङ्मये आयुर्वेदे आयुर्विज्ञानं सम्यक्तया प्रतिपादितमस्ति । यथा –

''एकस्वादु न भञ्जीत'' । 'अन्नेदमवधार्यताम: । आयुर्वेदे आयुर्विज्ञान'' । वैद्यशास्त्रे सदगुणा अपि आयुर्वधका इत्युक्तम ।

दानं, शीलं, दया, सत्यं, ब्रह्मचर्य; कृतज्ञत्व, मैत्री इत्यादयो गुणा: । रसायनान्यपि आयुर्वधकानि सन्ति ।

१. वीरमित्रोदय–३.१

मनुष्याणां गजानाञ्च परमायुः पञ्चदिनाधिकं विशत्यधिकं शतं वर्षाणि । अश्वानां द्वात्रिंशत् । अष्ट्रानां गर्दभानाञ्च पञ्चविंशतिः । गवां महिषाणाञ्च चतुर्विंशतिः । छागगवयमृगादीनां षोडश । शुनकसिंहमार्जारादीनां नखिनां द्वादश । अश्वादीनां जातानां ज्यौतिषेण पुरूषवदायुः प्रमाणमानीय त्रैराशिकं कर्तव्यम् । यदि पञ्चदिनाधिकं विंशत्यधिकं वर्षशतायुषः पुरूषस्य इदमायुस्तदा द्वात्रिंशद्वर्षायुषः किंस्यादितिएवमागतमायुः प्रमाणं वाच्यम् । ब्रह्मणः आयुः स्वमानेन वर्षशतम् । तत् परममित्युच्यते । तदर्धं परार्धमित्युच्यते ।

सामुद्रिकशास्त्रेण मनुष्याणामायुर्विज्ञानं यथा - कनिष्ठिका-मूलातर्जनीम्परतिमता हस्तस्थरेखा आयूरेखा । सातर्जनी स्पृशति चेत् शतं वर्षाण्यायुः । तर्जनी मध्यमान्तरं स्पृशति चेत् अशीतिवर्षाणि । मध्यमां स्पृशति चेत षष्टिः । तत ऊनाचेत् ऊनमायुः । ललाटे एका रेखा दृश्यते चेत विंशतिवर्षाण्यायुंः । द्वे रेखेचेत् चत्वारिंशत् । तिस्रो रेखाश्चेतषष्टिः । चतस्र, ततो बह्वयो वा चेत् शतं वर्षाणि ।

अपि च स्वर, सत्व, सम्पतिः जानुनोर्महत्वं, वृषणयोप्रलम्बत्वं, नाभेः पार्श्वायत्वंः हस्ताङ्गलीनां द्वीर्धत्वं, दीर्धाङ्गुलीपर्वत्वं, कर्णयोः रोमशत्वं, क्षतस्य युगपदनेकत्वं, निमेषस्य पञ्चमात्रत्वं एतानि अल्पायुलक्षणानि ।

विपरीतान्यल्पायुर्लक्षणानि । वृषणयोः रुद्धत्वं, भ्रुदोरभ्युन्नतत्वञ्च अल्पायुलक्षम् ।

गजशास्त्रे गजस्य आयुर्विज्ञानम् । यथा - भद्रगजस्य विशत्युत्तरशतं वर्षाण्यायुः । मन्द्रस्य अशीतिः । मृगस्य चत्वारिंशत् । सर्वक्षेत्राणां सम्पूर्णत्वे सम्पूर्णमायुः ।

यस्य कस्यापि हीनत्वे हीनम् । तत्र हस्तस्य लक्षणहीनत्वे दशवर्षहानिः । नेत्रयोर्लक्षणहोनत्वे विंशतिवर्षहानिः । एषा च वैदिकी प्रार्थना शतायुः कामयते ।

तच्चक्षुर्देवहितं शुक्रमुच्चरत् ।
पश्येम शरद शतं जीवेम शरदः शतम् ॥

शतमानं भवति । शतायुः पुरूषः शतेन्द्रियः आयुष्येवेन्द्रिये प्रति तिष्ठति इति श्रूयते । मत्स्यपुराणे १४ द्वतमेऽध्याये तु । यथा –

मन्वन्तराणि यानि स्युः कल्पे कल्पे चतुर्दश ।
व्यतीतानागतानि स्युर्यानि मन्वन्तरेष्विह ॥

विस्तरेणानुपूर्व्याच्च स्थितिं वक्ष्ये युगे युगे ।
तस्मिन्युगे च सम्भूतिर्यासां यावच्च जीवितम् ॥

युगमात्रं तु जीवन्ति न्यूनंतत्स्याद्द्वयेन च ।
चतुर्दशसु तावन्तो ज्ञेया मन्वन्तरेष्विह ॥

मनुत्याणां पशूनां च पक्षिणां स्थावरैः सह ।
तेषामायुरूपक्रान्तं युगधर्मेषु सर्वशः ॥

तथैवायुः परिक्रान्तं युगधर्मेषु सर्वशः ।
अस्थिति च कलौ दृष्ट्वा भूतानामायुषश्च वै ॥

परमायुः शतं त्वेतन्मानुषाणां कलौ स्मृतम् ।

इत्थं देवानां मानुषाणां पक्षिणाश्च पृथक् गणना कृतास्ति आयुनिर्धारणविषये । इत्यस्मादवगम्यते ।

### २.४.३ वैदिकवाङ्मये वृष्टिविज्ञानम्

विश्वेस्मिन् समस्तस्यापि ज्ञानविज्ञानस्योत्पादकाः भारतीयसभ्यतासंस्कृतेश्चाधारस्तम्भाः वेदा एव सन्ति । वेदेषु मानवजीवनोददेश्यभूताः धर्माकाममोक्षख्याश्चत्वारोऽपि पुरूषार्थाः साधु विवेचिताः सन्ति ।

वेदानां विषये भगवता मनुना प्रोक्तम् – सर्वज्ञानमयो हि स अर्थाद्धेदेषु सर्वविद्यानां सूत्राणि विद्यमानानि सन्ति । यत्र आचारशिक्षा, नीतिशिक्षा, सामाजिकजीवनम्, राजनीतिशास्त्रम्, तर्कशास्त्रादीनि विवेचितानि सन्ति । तत्रैव विज्ञानसम्बन्धिसामग्रीणामपि प्राचुर्येषा चर्चावलोक्यते । वेदेषु आयुर्विज्ञानेन सह वृष्टि विज्ञानमाद्यपि सम्यगुपलभ्यते ।

वृष्टिविज्ञानस्य सम्बन्धे मेधनिर्माणेन सहास्ति । तत्रापि विशेषेण मेधनिर्माणे सहायकतत्वानां, मेधस्य च विविधरूपाणां, वृष्टेरूपयो मिता, वृष्ट्यर्थ यज्ञस्य योगदानमन्येषाञ्चोपाष्ठदेयविषयाणां विवेचनं क्रियते । एतस्मिन् विषये वेदेषु पर्याप्त सामग्री उपलभ्यते । यथा –

**मेधनिर्माणम्**

सामान्यप्रक्रियानुसारं मेधनिर्माणमेव भवति –

सूर्यः स्वकिरणेभ्यः वापीकूपतडागनदीसमुद्रादीनां जलानि वाष्परूपेण परिणम्य, सूक्ष्मीकृत्य स्वस्थानम्प्रति नयति । तत्र तत् मीभूतम्भूत्वानन्तरकालेषु मेधरूपेण भवति । यास्काचार्येणाप्याह आदत्ते रसानादत्ते भासं ज्योतिषां वेति आदित्यः इति ।

यज्ञादिभिरूत्पन्नं यद्धूमन्तदप्यूर्ध्वमेव गच्छति, तदपि सूर्यकिरणानाम्प्रभावादुपर्येव गत्वा विद्युत्कणरूपेण परिवर्त्य धनीभूय च मेघरूपेण परिणमति । प्रोक्तञ्चापि भगवता मनुना

अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिद्रते ।
आदित्याज्जायते वृष्टिः वृष्टेर ततः प्रजाः ॥

तात्पर्यमिदमस्ति यद्यज्ञेषु धृतमादिकं द्रव्यमाहुतिरूपेणाग्नौ हूपते तदद्रव्यं धूमरूपं भूत्वा आदित्यमुपगच्छति । तया – हुत्या सूर्य आप्यायितो भवति । उक्तमपि याज्ञवल्क्येन –आप्यायते आहुत्या सूर्यः सूर्याद्रृष्टिरथौधिः इति । अर्थाद्येषु यजमानैः प्रक्षिप्तया आहत्या पुरोडाशादिरसेनाप्यायते सूर्यः । सूर्याच्च कालबशेन परिपकावाज्या दिह वीरसा दृष्टिभवतीति विज्ञानेश्वरोषोक्तं तीकायांम् । आहत्या तृप्तेन सूर्येण च पुनः वष्टिर्भवति, वृष्ट्या च औषधीनामुत्पत्तिः, औषधीनां सेवनेन प्रजासु शुक्रशोषितमुत्पद्यते । अत्र प्रश्नोत्पद्यते यदम्नौ प्रक्षिप्ताहतिः आदित्यमण्डले कथं गच्छति ? अस्य प्रश्नस्य समाधनमिदमस्ति यदग्नावाहतं द्रव्यं विद्युत्कषभूतम्भवत्ति । तत्कणिकाभ्यः द्विविधंतत्वं ध्नतग्ति्, णतडिच्च बहिरागच्छति । सूर्ये पर्याप्तमात्रायां णात्मकतडित्कणिकां स्वात्माभिमुखमाकर्षयति । विद्युच्छब्देनात्र)ग्नेरेव बोधे भवति । वेदेष्पनेकेषु मन्त्रेषष्विदमुक्तं यदपामन्तोग्निर्विद्यते । यद्यप्यग्निस्तु समस्तचराचरमन्तः विद्युते, स अपामन्त्रः स्थलप्यस्थि । अत एवाग्निरयां पित्तरूपेण वर्णितः । यत्रायमग्निरपां पुत्रा उक्तस्तत्रौवापामुत्पादकत्वेनापि वर्णितः । एतस्मादेवाग्नेः सकाशान्मेधनिमाणं, वृष्टिश्च भवति । इत्यनेनैदेद्धि भवति दपामन्तः विद्युदभावेन द्यिमानोग्निरेवाभ्रनिर्माणे कारभूतो वर्तते ।

एकमुक्तविवरणेनेद स्फुटं भवति यदप्सु सर्वेक्षा देवानां मानवानां च निवासो वर्तते । तस्मादेव जलं देवालय मुक्तं वेदेषु । तदुक्त तैतरीयेण – "आपो वै सर्पा देवता:" तथा च आपो वै देवानां परमं धर्म इति । विषययोमति गम्भीरो विशालश्च, नात्रोपप्रकरणरूपेढा सर्वेक्षामपि वृष्टिविज्ञानसम्बन्धितानां तथ्यानां समावेश: सुकरस्तस्मादत्रेव विरम्यते ।